M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 916

Title: Gadadhari

Z

		Gādādhari	Title.
			Author.
			Editor.
			Year, Vols.
MC			Publisher.
Nyaya		Incomplete	Remark.

916

916

श्रीगणेशाय नमः हेत्वाभासनिरूपणे प्रसंगस्यासंगतित्वं संभवति । व्याप्तिपक्षधर्मि पि
ता विशिष्टहेतुनिरूपणे सति व्याप्तिपक्षधर्मताविरोधितद्विरहवत्त्वेन दुष्टहेतोः
स्मरणात् अतस्तदप्रदर्शनेन मूलस्य न्यूनतां परिजिहीर्षुः प्रसंगस्यापि तन्नि
रूपणप्रयोजकत्वमाह एतावतेति परिकरो व्याप्तिपक्षधर्मते निरूप्येत्यंतं उक्त
क्रमेण दुष्टहेतोः स्मृतत्वस्य प्रसंगनिर्वाहकस्य लाभाय तत्प्रसंगादिति सपरि
करहेतुनिरूपितप्रसंगसंगतेरित्यर्थः तज्ज्ञानजन्यजिज्ञासाधीनत्वं पंचम्यर्थः
अन्वयश्चास्य निरूपणमित्यनेन तत्त्वनिर्णयविजयप्रयोजकत्वादिति मूलं ॥
यद्यपि हेत्वाभासादिनिष्ठतत्त्वनिर्णयोजनकज्ञानाविषयत्वार्थकतया शिष्यप्रव दि
त्त्युपयोगिनिरूपणघटकत्वाज्ञानप्रयोजन [illegible] प्रदर्शनपरं तथापि तन्मात्रपर
त्वे संगत्यप्रदर्शनेन न्यूनता स्यादिति तस्यैव कार्यकारित्वरूपसंगतिप्रद

र्शनपरत्वमपि संभवतीति स्फुटीकर्तुमाह तत्त्वनिर्णयादिति आदिपदाद्विजयपरिग्रहः तत्त्वा
र्थकारित्वात् सपरिकरहेतुप्रयोज्यकार्यप्रयोजकत्वात् प्रयोजकत्वं च जनकतावच्छेदका
दिसाधारणमिति स्वविषयकज्ञानकार्यं प्रति स्वस्य तथात्वमक्षतमेव तत्त्वनिर्णयः प्रमित
पत्र कोटिनिश्चयः अत्र व्याप्तिधर्मताविशिष्टप्रकृतहेतुज्ञानमिव तद्विपरीतकोटिसाधकस्य हे
त्वाभासत्वज्ञानमुपयुज्यते प्रतिबंधकीभूतविपरीतकोटिव्याप्यवत्ताज्ञाने अप्रामाण्य
ग्राहकत्वादित्युभयोस्तत्त्वनिर्णयप्रयोजकत्वं अथवा तत्त्वनिर्णयः साध्यवत्ताज्ञाने प्र
मात्वनिर्णयः तत्रानुमापकहेतोः व्याप्त्यादिविशिष्टत्वरूपसद्धेतुत्वज्ञानमिव विपरी
तकोटिसाधकहेतोः दुष्टत्वज्ञानमप्युपयुज्यते प्रकृतसाध्यग्रहाप्रामाण्यग्राहकवि
परीतकोटिसाधकहेतुदुष्टत्वग्रहविघटकत्वात् विजयप्रयोजकत्वं च हेत्वाभास
स्य स्वज्ञानाधीनपरोक्तहेतुदोषोद्भावनद्वारा व्याप्त्यादिविशिष्टहेतोश्च स्वज्ञानाधी

नसन्न्यायप्रयोगद्वाराबोध्यं मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः यथार्थ
ज्ञाननिष्ठानुमितिप्रतिबं[stain]धकतावच्छेदकविषयताश्रयत्वपर्यंतस्य समूहालंबनविष
यताश्रयोदासीनपदार्थवारणाय प्रथमलक्षणे विवक्षणीयतया बाधादिज्ञानप्रतिबं
धकतायां प्रायशो हेतुविषयताजनवच्छेदकत्वात् तत्र हेताव्याप्तिश्च यद्विषयकत्वेने त्व
त्यादिलक्षणे च तृतीयाया अवच्छेदकत्वार्थकतया सुतरां तथेत्यत आह यथाश्रुतमिति इ
दं एतल्लक्षणत्रयं ननु हेतुवदाभासंते इति व्युत्पत्त्या हेत्वाभासपदस्य दुष्टहेतुपरत्वात् दु
ष्टहेतुनिरूपणस्यैव प्रतिज्ञात[stain]त्वात् न हल्लक्षणामप्याकांक्षितं तदनुक्तौ मूलस्य न्यूनता अ
न्यविधव्युत्पत्त्या हेत्वाभासस्य हेतुदोषपरत्वसंभवेपि तेनेत्यादिना दुष्टहेतूनामेव विभज
नात् दुष्टनिरूपणस्य अप्रतिज्ञातत्वेन तदसंगतेः एवं दुष्टहेतुनिरूपणस्याप्रकृतत्वे दुष्ट
हेतूनां विभागान[stain]र्हतया तेषां संकरेण विभागव्याघातशंकाया अनवतारात् उपधेयसंक

गदा०

२ रेपीत्यादिग्रंथेस्यउपाध्यसंकरेणविभागोपपादनस्यपूर्वेअसंगतेरित्यतआह तदत्वंचेति
तादृशदोषवत्वंचेत्यर्थः दुष्टहेतूनांलक्षणमित्यनुषज्यतेस्फुटमितिशेषः तथाचदुष्टहे
निरूपणत्वे तुलक्षणस्यप्रकृतत्वेपिदोषलक्षणेकृते दुष्टहेतुलक्षणस्यस्फुटतयालाभेनदोषल
क्षणाभिधानस्यतत्रतात्पर्यान्नानुपपत्तिरितिभावः तदभिप्रायेणैवेति दुष्टहेतुलक्ष
णाभिप्रायेणैवेत्यर्थः अनुमितिपदस्य अनुमितिसामान्यपरत्वे असंभवात् प्रकृतपक्ष अतिप्रसंगात्॥५
साध्यकानुमितिपरत्वमावश्यकं तथाचव्यभिचारादावव्याप्तिः वह्निर्धूमव्यभिचारी
त्यादिज्ञानाभावस्यपर्वतोधूमवानित्याद्यनुमत्यजनकत्वात् लक्षणयातस्यतादृशानु
५ मितिकारणज्ञानमात्रपरत्वे बाधावव्याप्तिः बाधादिज्ञानस्यपरामर्शाप्रतिबंधकत्वा
अतोनुमितिपदमजहत्स्वार्थलक्षणयातदुभयपरतयाव्याचष्टे तत्रेति तादृशल २
क्षणावैवेत्यर्थः लक्षणघटकतावच्छेदकमुभयसाधारणमनुगतंरूपमाह

अनुमितिनिष्ठकार्यतानिरूपितसंबंधित्वेनेति अनुमितिपदस्यप्रकृतपक्षतावच्छेदकविशिष्ट
प्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिपरत्वं
स्वयमेवदर्शयिष्यति अतोनवक्ष्यमाणदोषप्रसंगः निरूपकत्वंचयदिप्रतियोगित्वंतदा
कार्यस्यकार्यताप्रतियोगित्वाभावात् अनुमित्यसंग्रहः अतः संबंधिपदंसंबंधिद्वयसाधा
रणस्यतत्साक्षात्कारजनकसाक्षात्कारविषयतात्मकनिरूपकत्वंलाभाय अत्रपर्वतोवह्नि स्य
मान्हृदश्च तथेत्यादिसमूहालंबनानुमित्यादिविरोधिहृदनिष्ठवह्न्यभावादिरूपबाधादेःप
दिना र्वतोद्देशधूमोत्सवह्न्यदिसाधनदोषताप्रसंगः प्रकृतानुमितिनिष्ठतानिरूपकसंबंधिमह कार्य
त्वस्यकस्यापिप्रतिबध्यतानवच्छेदकतयातद्वच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकता
निवेशनासंभवात् तथाविधमहत्वव्यापकप्रतिबध्यतानिवेशेच अनुमित्यविरोधीनिव्य

२

तत्प्रसंगउपोद्घातोवसरोहेतुतान्वया॥निर्वाहकैककार्यत्वेषोढासंगतिरिष्यते॥१॥

२

भिचारादिपरामर्शाविरोधिनिबाधादिचाव्याप्तिः उभयविरोधिपक्षाप्रसिध्यादावेवतादृशप्रतिब
ध्यतानिरूपकज्ञानविषयत्वसत्वात् अतः कल्पांतरमाह साध्यव्याप्तेति प्रकृतपक्षतावच्छेदकविशि
ष्टपक्षप्रकृतसाध्यतावच्छेदकावच्छिन्नव्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारका
नुमितिसामान्यपरंइत्यर्थः एवंचतादृशसमूहालंबनानुमितेःव्याप्त्यादिविषयकतयाव्यभिचा
रज्ञानादिप्रतिबध्यत्वात् नव्यभिचाराद्यसंग्रहः इहादौवह्न्यादिविषयकदर्शितसमूहालंबना
दा नुमितिप्रतिबंधकतामादाय अतिप्रसंगस्यवारणायसामान्यपदं तथाचतादृशानुमितित्वव्या
पकप्रतिबध्यतानिरूपितप्रतिबंधकताशालियथार्थज्ञानविषयत्वंपर्यवसितोर्थः साध्यताव
च्छेदकावच्छिन्नप्रकारकानुमितिसामान्यांतर्गतायांपर्वतोवह्निमान्वह्निव्याप्यधूमवांश्चे
त्याद्यनुमितौह्रदोनवह्निमानित्यादिनिश्चयस्याप्रतिबंधकत्वात्नातिव्याप्तिरितिभावः बाधस
त्प्रतिपक्षस्वरूपासिध्याश्रयासिद्धिष्वव्याप्तिवारणायप्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविरोध्य

कत्वनिवेशः द्रव्यत्वादिना ह्रदादिविशेष्यकानुमितौ तथाविधनिश्चयस्याप्रतिबंधकत्वात्तद्दोषता
दवस्थ्यं अतः पक्षतावच्छेदकावच्छिन्नत्वोपादानं अवच्छेदकत्वं च तत्पर्याप्त्यधिकरणत्वं तेन अ
तेजस्वी पर्वतो वह्निमानित्यादौ विशिष्टपर्वतत्वादिमति वह्न्याद्यभावरूपबाधस्य कांचनमय
पर्वतो वह्निमान् इत्यादौ पक्षासिद्धेः शुद्धपर्वतत्वाद्यवच्छिन्नापक्षकानुमित्यविरोधित्वेपि नासं
ग्रहः एवमग्रेपि बोध्यं साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वानिवेशे परामर्शाविरो
धितया बाधसत्प्रतिपक्षयोरव्याप्तिः तत्र प्रकृतसाध्यतावच्छेदकावच्छिन्नत्वस्यानुपादानेपि तद्
दोषतादवस्थ्यं वह्नित्वावच्छिन्नाभावादिनिश्चयस्य धूमजनकतेजस्वी वह्निव्याप्यधूमवान्
ह्रद इत्याद्यनुमित्यप्रतिबंधकत्वात् यत्तु साध्याप्रसिध्यादौ अव्याप्तिवारणकत्वं तदुपादान ४
स्य इति तु न सत् वह्निर्न कांचनमय इत्यादिनिर्णयस्य पक्षे शुद्धवह्नित्वादिनावह्न्यनुमि

त्यविरोधित्वेपि द्वितीयस्थले प्रकृतसाध्यतावच्छेदकावच्छिन्नांतर्भावस्य सत्वान्नस्य कांचनमयवह्निव्या
प्यधूमवानयं पर्वत इति अनुमितिविरोधितया तत्र लक्षणगमनात् द्वितीयस्थले प्रवेशाद्व्यभि
चारविरोधसाधनाधानाप्रसिद्धिस्वरूपासिद्धिषु न व्याप्तिः तत्रापि साध्यतावच्छेदकावच्छिन्ननि
रूपितव्याप्तिविशिष्टत्वनिवेशात् व्यभिचारविरोधयोर्नाव्याप्तिः वह्निर्धूमव्यभिचारीत्यादि
ज्ञानदशायामपि द्रव्यत्वादिना धूमादिनिरूपितव्याप्तेः भानसंभवान्न दोषतादवस्थ्यं अ
तो व्याप्तौ साध्यतावच्छेदकावच्छिन्नीयत्वनिवेशः अन्वयव्याप्तिव्यतिरेकव्याप्तिविशिष्टो
पादाय तदुभयविशिष्टहेतुप्रकारकत्वमेव निवेशनीयं एकतरमात्रव्याप्त्युपादाने सा
धारणत्वानुपसंहारित्वयोः एकतरासंग्रहप्रसंगादित्यमेव्यक्तीभविष्यति तादृशव्याप्ति
द्वयप्रकारतानिरूपितहेतुप्रकारतायाः न तु साध्यकतद्धेतुकानुमितिजनकतावच्छेदकप्रका

शि०गा०टे०

५ रताकत्वेनानुगमय्यनिवेशस्तु न संभवति साध्याभाववद्वृत्तित्वज्ञानदशायां केवलव्यतिरेकि
व्याप्त्यादिप्रकारकहेतुमत्ताज्ञानोत्पत्त्यासाधारण्यादेस्तादृशप्रकारताशाल्यनुमिति
सामान्यविरोधित्वाभावात् तादृशव्याप्तिविशिष्टविषयकत्वमात्रस्य तद्विशिष्टहेतु
तावच्छेदकावच्छिन्नविषयकत्वमात्रस्य वा निवेशे स्वरूपासिद्धाव्याप्तिः अतः पक्षांशे
तादृशव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारकत्वनिवेशः पक्षांशे हेतुप्रका
रकत्वमात्रनिवेशेऽपि तद्दोषतादवस्थ्यं धूमाभाववान्वह्नेरित्यादौ ज्ञानस्य वह्नित्वादिना रि म
हेतुमत्ताज्ञानाविरोधित्वात् साधारण्यादावव्याप्तिश्च वह्नित्वाद्यवच्छिन्नधूमाभाव
वद्वृत्तित्वमहस्य धूमादिव्याप्तिविशिष्टतद्व्यक्तित्वावच्छिन्नप्रकारकज्ञानाविरोधित्वा ५
दतो हेतुतावच्छेदकावच्छिन्नत्वनिवेशः पक्षांशे साध्यादिप्रकारकस्य संस्कारादेराह

र्ज्ञानस्य च बाधादिज्ञानाप्रतिबध्यकत्वात् असंभवश्चेत्यतस्तादृशानुमितित्वनिवेशः साध्यव्या
प्यहेतुधर्मितावच्छेदकसाध्यवत्ताज्ञानस्यैव साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकार
कतया तादृशाकारलिखनस्वरसात् तादृशहेतुविशिष्टपक्षतावच्छेदकावच्छिन्नविशेष्यकसा क
ध्यतावच्छेदकावच्छिन्नप्रकारकानुमितित्वव्यापकप्रतिबध्यतानिरूपकप्रतिबंधकत्वस्य
लक्षणघटकत्वोपगमे पर्वतत्वाद्यवच्छेदेन वह्न्यादेः साध्यत्वे तत्सामानाधिकरण्येन साध्या
भावादेरशेषस्यैत्वप्रसंगः सामानाधिकरण्यमात्रावगाहिबाधादिज्ञानस्य शुद्धपर्वत
क्र त्वाद्यवच्छेदेन वह्न्यादिज्ञानं प्रत्येव प्रतिबंधकतया धूमविशिष्टपर्वतत्वावच्छिन्नधर्मिकव
ह्न्यादिज्ञानाप्रतिबंधकत्वादिति तदुपेक्षितं नन्वेवं विशेष्यतावच्छेदककोटौ धूमादेर
धिकस्य भानेऽपि शुद्धपर्वतत्वाद्यवच्छिन्नसंयोगादेः यत्र संसर्गता तत्र पर्वतत्वसामा

नाधिकरण्येन वह्न्याभावादिज्ञानस्य प्रतिबंधकत्वमावश्यकं तादृशानुमितेरपि शुद्धपर्वतत्वावच्छेदे
न वह्न्याद्यवगाहित्वादिति वाच्यं धर्मितावच्छेदकावच्छेन विशिष्टबुद्धौ धर्मितावच्छेदकताप
र्याप्त्यधिकरणधर्मावच्छिन्नत्वमेव संसर्गांशे भासते न तु तदेकदेशावच्छिन्नत्वमपि तद्ध
र्मावच्छिन्नविशेष्यतानिरूपिततदेकदेशव्यापकतावच्छिन्नसंसर्गतायाः अप्रामाणि
कत्वानंत्वात् अथ लिंगोपधानमते हेतोः सर्वत्रैव धर्मितावच्छेदकतया भानात् तादृशसंस
र्गताभ्युपगम आवश्यकः अन्यथा शुद्धपर्वतत्वाद्यवच्छेदेन हेतुमत्त्वोस्थले हेतुविशिष्ट तान
पर्वतत्वावच्छिन्न संयोगादिसंसर्गकानुमितेरनभ्युपगमे पर्वतत्वादिसामानाधि
करण्यमात्रावगाहिबाधादिग्रहकालेपि तथाविधसाध्यनिश्चयवतोनुमित्याप ६
त्तेः न हि सामानाधिकरण्येन बाधासिध्योः सत्वोरनुमितिं कापि दूषयति तादृशबा

धादिग्रहस्य क्वचिदप्यनुमितिप्रतिबंधकत्वासंभवात्तेषां हेत्वाभासताविलोपापत्तिश्चेति चेत् एव
मपि लिंगानुपधानमते तादृशविषयतायां मानाभावः प्रकृतग्रंथस्तु न लिंगोपधानमताभिप्रा
यकः तन्मते अनुमितेः सर्वत्रैव तथाकारतया तादृशाकारत्वस्याव्यावर्तकतया अनुमितिपदस्य ता
दृशाकारानुमितिपरत्वप्रदर्शनासंगतेः केचित्तु लिंगानुपधानमते अनुमितिपदस्य तदुभ
यपरत्वं व्याख्याय यथाश्रुतार्थपरतानिर्वाहार्यं लिंगोपधानमतमाश्रयंते साध्यव्याप्यत्वादि
नाऽऽत्ताकारानुमितिपरं अनुमितेरित्याकारकतामताभिप्रायकमिति व्याचक्षते व्याख्यानप्रयो
शि जनं स्फुटयति तेनेति एकत्रैव त्वाद्येकधर्मावच्छिन्ने व्यभिचारादीत्यादिना स्वरूपासिद्धि
परिग्रहः अन्यस्य परामर्शात् तद्द्वित्वादिरूपापरधर्मावच्छिन्ने व्याप्तिपक्षधर्मताद्यवगाहि
ज्ञानात् व्यभिचारादित्यादिहेतोः अनुमित्यजनकत्वेपीत्यनेनान्वयः यत्र यद्रूपावच्छिन्ने
व्यभिचारज्ञानोत्पत्तिः द्वितीयक्षणे कथंचित्तद्रूपावच्छिन्नलिंगकपरामर्शस्तत्रैव क्षयविलंबेन

त्रि॰गा॰दे॰

द

नाधिकरण्येन वह्न्यभावादिज्ञानस्य प्रतिबंधकत्वमावश्यकं तादृशानुमितेरपि शृङ्गपर्वतत्वावच्छे
दनवह्न्याद्यवगाहित्वादिति वाच्यं धर्मितावच्छेदकावच्छिन्नविशिष्टबुद्धौ धर्मितावच्छेदकताप
र्याप्त्यधिकरणधर्मावच्छिन्नत्वमेव संसर्गांशे भासते न तु तदेकदेशावच्छिन्नत्वमपि तद्ध
र्मावच्छिन्नविशेष्यतानिरूपिततदेकदेशव्यापकतावच्छिन्नसंसर्गताया अप्रामाणिकभावि
कज्ञानंत्वात् अथ लिंगोपधानमते हेतोः सर्वत्रैव धर्मितावच्छेदकतया भानात् तादृशसंस
र्गताभ्युपगम आवश्यकः अन्यथा शृङ्गपर्वतत्वाद्यवच्छेदेन हेतुमत्तौस्थले हेतुविशिष्ट ज्ञान
पर्वतत्वावच्छिन्न[?] संयोगादिसंसर्गकानुमितेरवाभ्युपगमे पर्वतत्वादिसामानाधि
करण्यमात्रावगाहिबाधादिग्रहकालेऽपि तथाविधसाध्यनिश्चयवतोऽनुमित्यापत् द
तेः नहि सामानाधिकरण्येन बाधासिध्योः सत्योरनुमितिं कश्चिदुपैति तादृशबा

धादिग्रहस्य कचिदप्यनुमितिप्रतिबंधकत्वासंभवात्तेषां हेत्वाभासताविलोपापत्तिश्चेति चेत् एव
मपि लिंगानुपधानमते तादृशविषयतायां मानाभावः प्रकृतग्रंथस्तु न लिंगोपधानमताभिप्रा
यकः तन्मते अनुमितेः सर्वत्रैव तथाकारतया तादृशाकारत्वस्याव्यावर्तकतया अनुमितिपदस्यता
दृशाकारानुमितिपरत्वप्रदर्शनासंगतेः केचित्तु लिंगानुपधानमते अनुमितिपदस्य तदुभ
यपरत्वं व्याख्याय यथाश्रुतार्थपरतानिर्वाहार्थं लिंगोपधानमतमाश्रयते साध्यव्याप्येत्यादि
नाऽत्याकारानुमितिपरं अनुमितेरित्याकारकत्वामताभिप्रायकमिति व्याचक्षते व्याख्यानप्रयो
द्वि जनं स्फुटयति तेनेति एकत्रैव[?] त्वाद्येकधर्मावच्छिन्ने व्यभिचारादीत्यादिना स्वरूपासिद्धि
परिग्रहः अन्यस्य परामर्शात् तद्वह्नित्वादिरूपापरधर्मावच्छिन्ने व्याप्तिपक्षधर्मताद्यवगाहि
ज्ञानात् व्यभिचारादित्यादिहेतोः अनुमित्यजनकत्वेपीत्यनेन न संबंधः यत्र यद्रूपावच्छिन्ने
व्यभिचारज्ञानोत्पत्तिः द्वितीयक्षणे कथंचित्तद्रूपावच्छिन्नलिंगकपरामर्शस्तत्रैव क्षणविलंबेन

७ अनुमित्युपगमे व्यभिचारासंभवात् न तत्र व्यभिचारो दर्शितः ननु तद्धर्मावच्छिन्नलिंगकानुमितौ तद्धर्माव
च्छिन्नधर्मिकव्यभिचारज्ञानाभावस्य हेतुत्वोपगमान्नोक्तव्यभिचारः तद्धर्मावच्छिन्नलिंगकत्वं च
स्वसमानाधिकरणस्वाव्यवहितोत्तरत्वसंबंधेन तद्रूपावच्छिन्नतद्धर्मिकव्याप्त्यादिज्ञानविशिष्टत्वं
तादृशसंबंधेन व्यभिचारज्ञानविशिष्टयत्तदन्यत्वमेव वा जन्यतावच्छेदकं वाच्यं तेन धूमव्याप्यव
ह्निमान् व्यभिचाराकारकज्ञानादिपरामर्शोत्पत्तिद्वितीयक्षणे यत्र लौकिकसंनिकर्षजन्यो वह्नि
व्या धूमव्यभिचारी धूम इत्येवं धनवानित्याकारकसमूहालंबनं गृहस्तत्र तज्जन्यानुमितेः उक्तसंबंधेन
वह्नित्वाद्यवच्छिन्नधर्मिकव्याप्त्यादिज्ञानविशिष्टत्वेपि न क्षतिरिति तथा च नायं व्यभिचार इत्य
त आह व्याप्त्यादिरिति कृत्स्नकारणताकव्याप्तिज्ञानसत्त्वे व्यभिचारज्ञानाद्यभावव्यतिरेकेणानु
मितिव्यतिरेकस्यासिद्धत्वादिति भावः व्याप्तिज्ञानादेर्व्यभिचारज्ञानाभावेनान्यथासिद्धत्वशं ७
काप्रागेव निराकृता न क्षतिः व्यभिचारादेर्नाव्याप्तिः यत्रासद्धेतुविशेषतादृशानुमितिरप्रसि

द्धा तत्र सत्त्वे व्याप्तेर्वक्ष्यमाणतया एतादृशयथाश्रुतव्याख्यायामनिर्भरसूचनाय वदंतीति पर्वतो
वह्निमान् धूमादित्यादिसद्धेतुस्थले बाधादिभ्रमविषये अतिव्याप्तिवारकतया यथाश्रुतं यथार्थ
पदं सार्थकयति पर्वतो निर्वह्निरिति अत्र इतिपदस्य त्रितयस्य फलं प्रत्येकं संबंधात् भ्रमत्रितय
लाभः प्रत्येकं भ्रममादायैवातिप्रसंगसंभवात् तादृशसमूहालंबनभ्रमपर्यंतानुधावनेनैव फलाभा
वस्य रत्वासंगतिरिति ध्येयं प्रथमभ्रमो नानुमितिविरोधी अंत्यो च तज्जनकज्ञाने तथा तयोरपि प्र
पमन्यत्र प्रसिद्धस्य साध्याभाववद्वृत्तित्वस्य धूमाद्यंशे भ्रमत्वं अंत्यप्रमेयत्वाभावस्याप्रसि
ध्या न तत्र भ्रमत्वं किंत्वभावांशे अनुयोगिताविशेषसंबंधेन साध्यस्य भ्रमत्वं इत्येतादृशा
विशेषमादृत्य शिष्यव्युत्पादनायानेक[illegible]विधभ्रमकथनं इदं त्ववधेयं अभिधेये यत्वं प्रमे
यत्वस्य व्यभिचारी तत्र स्वरूपसंबंधावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वसं

८ बंधेनप्रमेयत्वस्यभ्रमोवाच्यः प्रतियोगितांशेसाध्यतावच्छेदकधर्मसाध्यतावच्छेदकसंबंधावच्छिन्नत्वयोःसा
क ध्याभाववद्वृत्तित्वरूपव्याप्तिघटकतयातदंशेतदुभयावगाहिव्यभिचारज्ञानस्यव्याप्तिज्ञानवि
रोधित्वात् एवंचप्रमेयत्वभेदाद्येप्रमेयत्वत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्याप्रसिद्धावपिस्वरू
पसंबंधावच्छिन्नतादृशप्रतियोगिताकत्वाप्रसिध्यातादृशभ्रमानुपपत्तिः प्रतियोगितां
शेसंबंधविशेषावच्छिन्नत्वस्यभ्रमइत्याद्यनुक्तं तस्यसंबंधघटकतयातत्प्रकारकत्वघटि
ततद्भ्रमत्वानुपपत्तिः नचतेनरूपेणप्रतियोगिताप्रकारकएवात्रभ्रमोविवक्षितः नतुतदवच्छि
न्नप्रतियोगिताकत्वसंसर्गकइतिवाच्यं लाघवात्प्रतियोगिताकत्वसंसर्गकव्याप्तिज्ञानस्य
वानुमितिहेतुतयातत्प्रकारकव्यभिचारज्ञानस्याकिंचित्करत्वात् अत्राहुः स्वावच्छिन्नसा
ध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वसंबंधेनसाध्यतावच्छेदकवत्त्वमेवाभावस्य ८

साध्याभाववदवृत्तित्वरूपव्याप्तिघटकंलाघवात् एवंचतादृशसंबंधेनाभावांशेसाध्यतावच्छेदक
प्रकारकव्यभिचारज्ञानस्यव्याप्तिग्रहविरोधितयाघटत्वादेःप्रसिद्धेनतादृशसंबंधेनप्रमे
यत्वा त्वादिरभावांशेभ्रमात्मकएवतथाविधग्रहोविवक्षितइतिनकिंचिदनुपपन्नमिति
प्रथमेसाध्याभाववदवृत्तित्वज्ञानविरोधीहेतौसाध्याभाववद्वृत्तित्वरूपव्यभिचारस्यभ्रमः
द्वितीयेचतदप्रसिध्याव्यापकसामानाधिकरण्यग्रहविरोधीसाध्यतावच्छेदकेहेतुसमा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वस्यभ्रमोभिमतः समानप्रकारकज्ञानस्यैवविरोधित
याद्विविधव्यभिचारसंग्रहायद्विविधव्याप्तिविषयकसमूहालंबनस्यैवलक्षणनिवेश्यत्वात् न
चहेतुःसाध्यव्यभिचारीत्यतःसाध्यतावच्छेदकेहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदक
त्वस्यदुर्लभतयातदवगाहिज्ञानस्याभिधेयत्वेप्रमेयत्वस्यव्यभिचारीत्याकारकज्ञानोपपद्यतइ

५ ति वाच्यं यत्तोभाववद्वृत्तित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वं चेति द्वयमेव हेतुः साध्यस्य व्यभिचारीत्यत्र व्य
भिचारपदार्थः तत्रादिमव्यभिचारत्वं सर्वं यत्र स्थले व्यभिचारपदार्थैकदेशे अभावे अनुयोगितारूपषष्ठ्यर्थस्य तत्र
प्रकृत्यर्थतावच्छेदकवद्वृत्तित्वाद्यवच्छिन्ननिरूपितत्वसंबंधेन प्रकृत्यर्थस्यान्वयः प्रकृत्यर्थो यार्थः स्वरूपसंबंधवान् तस्य
दा अभेदसंबंधेन प्रथमांतार्थे अन्वयः द्वितीयतत्पदार्थं परवाक्यस्थले च तदेकदेशे सामानाधिकरण्ये हेतुपदार्थो। च तत्प्रथमा
तार्थनिरूपितत्वस्यान्वयः षष्ठीमर्थ तत्तदर्थपरतया षष्ठ्यर्थतार्थस्य साध्यतावच्छेदकनिष्ठत्वस्य तादृशान्वयतस्य
हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वतस्य तद्धितार्थीभूतसंबंधिनः एकदेशे घटकत्वरूपसंबंधेन सं
बंधिनश्चाभेदेन प्रथमांतार्थे अन्वयः एवं चोक्तवाक्यात्तत्र साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रति
योगितावच्छेदकत्वस्यापि लाभात्तदवगाहिभ्रमस्य दर्शितकारतासंभावादित्यपि च दर्शित प्रमादिति पंचम्य
र्थे प्रयुक्तत्वं तस्य प्रतिबंधपदार्थे अनुत्पादे अन्वयः यथार्थेतीति यथार्थपददानेन त्वव्यधिकरणप्रकारावच्छिन्ना
यां याविषयतातत्त्वदर्शनिरूपकत्वस्य सर्वांशे प्रमात्वस्य विवक्षणीयतया दर्शितभ्रमणां किंचिदंशे प्रमात्वेपि ५

न तादृशाया दोष इति भावः अत्र यथार्थपदेन सद्धेतुस्थले अनुमितिविरोधिभ्रमविषयसाध्याभाववद्वृत्तित्वप्रसंग
वारणेपि असद्धेतुस्थले तादृशभ्रमाविषयदोषघटकसाध्यादेः प्रत्येकं दोषत्वापत्तिर्दुर्वारैवेति तदर्थं प्रकारांतरा
नुसरणं च तत एव पूर्वदोषस्य वारणाय यथार्थपदं व्यर्थमिति दोषस्य दुरुद्धरतया तस्यैव यथार्थपदाघटितलक्षणां
तरानुसरणबीजत्वमाह नन्विति एकदेशस्य विशिष्टघटकतया हेत्वाभासपदार्थत्वस्येष्टत्वादाह प्रत्येकमिति
प्रत्येकपदार्थपर्याप्तसाध्यतावच्छेदकावच्छिन्नस्येत्यर्थः हेत्वाभासत्वापत्तिः हेत्वाभासपदार्थत्वापत्तिः
यद्रूपावच्छिन्नज्ञानस्यानुमित्यविरोधित्वं तद्रूपावच्छिन्ने हेत्वाभासत्वव्यवहारस्य तद्रूपावच्छिन्नवत्ताज्ञाना
द्धेतोर्दुष्टत्वव्यवहारस्य चानुदयेनात्रेष्टापत्तिर्न संभवतीति भावः यादृशविशिष्टविषयकत्वं तादृशानु
मितिविरोधित्वान्नातिरिक्तवृत्तितत्वमितिविरहस्य यान साध्याशवतिव्याप्तिरित्याशयेन आशंकते अ
थेति विशिष्टविषयकं साध्याभाववद्वृत्तित्वविशिष्टसाधनादिविषयकमेवत द्घटकं च तादृशवि
शिष्टघटकप्रत्येकपदार्थविषयकत्वं च न विशिष्टं न तादृशविशिष्टनिरूपितं तथा च प्रत्येकपदार्थविषय

१० कत्वस्य प्रतिबंधकतायाअनतिरिक्तवृत्तित्वान्नातिव्याप्तिरितिभावः व्यर्थमितियथार्थपदादानेपिसद्धेतुस्थले अति
व्याप्तिवारणसंभवात् ननुतत्रभ्रमविषयप्रत्येकपदार्थस्यउक्तरीत्यावारणेपितद्विशिष्टअतिव्याप्तिरित्यतआ
हभ्रमविषयेतिअप्रसिद्धत्वादितितथाचक्वाति[.]व्याप्तिरितिभावः केचि[..]त्विति नन्वस्यदुष्टहेतुलक्षणत्वे
दोषघटितव्याप्तिः तेषामप्यनुमितिविरोधियथार्थज्ञानविषयत्वात् नच ह्रदत्वावच्छिन्नपक्षकवह्न्यादिसा
ध्यकस्थलेवह्न्यभावप्रह्रदादिरूपदोषाणामपिदुष्टहेतुत्वमिष्टमेवेतिवाच्यं तद्रूपावच्छिन्नपक्षकतद्रूपावच्छि
न्नसाध्यकतद्रूपावच्छिन्नहेतुकस्थलेतेनरूपेनदुष्टस्थललक्षणंयदितद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिवि
रोधियथार्थज्ञानविषयत्वमात्रंतदाह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतु
कानुमितिप्रतिबंधकभ्रमाविषयवह्न्यभावप्रह्रदादीनांधूमत्वादिनादुष्टत्वाभावादतिव्याप्तिरित्याशंका
परिजिहीर्षुस्तादृशाभावप्रतियोगिनांयथार्थज्ञानमितिषष्ठीसमासमाश्रित्यतादृशाभावप्रतियोगि १०
प्रकारकयथार्थज्ञानविषयत्वमर्थंव्याख्यास्यति तच्चसा[.]मानदोषस्यप्रतिबंधकतामतएवसंगच्छतेअ
मे

नस्तन्मतमवलंब्याह तत्रेतितृलक्षणेधूम[.]ध्येत्यर्थः तृतीयलक्षणस्यसर्वमतएवज्ञायमानदोषप्रतिबंधकता
भिप्रायकतयादृष्टांतत्वेनोपन्यासः तदर्थश्चेतिप्रतियोग्यंतेनदोषानांद्वितीयलक्षणसंगमनीयमितिदर्शयितुंव्य
भिचाराद्यदरीति ननुतेनरूपेणलक्षणघटकत्वमित्यवधेयं एवंच यथार्थपदादानेनादृशभ्रममादायप्रकृतहेतु
भिन्नेअतिप्रसंगइतियथार्थपदसार्थक्यं यद्यपिपर्वतत्वावच्छिन्नेवह्नित्वाद्यवच्छिन्नसाध्यनेधूमत्वाद्यवच्छिन्नो
दुष्टइत्यादेः सद्धेतौदुष्टत्वव्यवहारस्यनापत्तिः तत्रतत्साध्यपक्षहेतुकानुमितिप्रतिबंधकरूपदोषप्रकारक
ज्ञानविषयत्वस्यैवप्रत्येतव्यत्वात् तादृशानुमितिप्रतिबंधकबाधव्यभिचारादेश्चैवप्रसिद्धत्वात् ह्रदादौव अ
ह्न्यादिसाधनमादायसर्वत्रैवदुष्टव्यवहारवृष्टः तथापिधूमसाधनेवह्नित्वे[.]नायंदुष्टइत्यादौवह्नित्वावच्छिन्नहेतु
कधूमाद्यनुमितिप्रतिबंधकदोषप्रकारकज्ञानविषयत्वस्यप्रत्ययाद्दृश्यमानसंबंधावच्छिन्नतादृशानुमि
तिप्रतिबंधकधूमाभाववद्वृत्तित्वविशिष्टवह्न्यादिरूपप्रसिद्धदोषप्रकारताशालिभ्रममादायैवोक्तसमादि
तात्पर्येणापितथाव्यवहारः स्यात् नचविशेष्यतेतृतीयांतार्थवह्नित्ववैशिष्ट्यमाननालक्षासंभवाद्वाधेननीय

११ मतिप्रसंगइतिवाच्यं तथा सति दोषपदार्थघटकानुमितौ वह्नित्वावच्छिन्नहेतुकत्वालाभात् न ह्यत्रानुरोधेन हेतु
प्रकारकज्ञानजन्यानुमितिप्रतिबंधकरूपदोषपदार्थघटके हेतौ वह्नित्वविशिष्टत्वरूपतृतीयांतार्थस्य तत्प्र
कारतायां वा अवच्छिन्नत्वार्थकतृतीयांतलभ्यवह्नित्वावच्छिन्नत्वस्य अन्वयस्स्वेवोपगंतव्यत्वात् न च
विशेष्यवह्नित्वादिधर्मवैशिष्ट्यबोधकपदसमभिव्याहारस्थले दुष धातोरेव वह्नित्वावच्छिन्नहेतुकानुमिति
प्रति बंधकोर्थः अथवा अनुमित्यर्थकसाधनशब्दस्यैव वह्नित्वाद्यवच्छिन्नहेतुकानुमितिरूपविशेषलाक्षणि
कत्वं दुषधात्वर्थे अनुमित्यंतर्भावे साधनपदार्थानन्वयप्रसंगात् तथा च विशेष्यएव तृतीयार्थवैशिष्ट्या
न्वयोपगमात् नोक्तातिप्रसंग इति वाच्यं एवमपि वह्निना धूमसाधने रासभो दुष्ट इति व्यवहारस्य भ्र
ममात्रत्वापातिप्रसंगादिति अथवा एतद्भेदानुमापकमेवैतल्लक्षणं तथा च पर्वतपक्षकधूमसाध्यकवह्नि
हेतुकदुष्टलक्षणस्य तथाविधानुमितिविरोधिव्यभिचारादिभ्रममादाय सद्हेताविति भेद्व्यभिचारित्वा र ११
द्यर्थपरं ज्ञानं चात्र स्वज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसंबंधावगाहि मान्यं तेन प्रकृतहेतुभि
ग्र

न्यस्यापि संबंधांतरेण दोषप्रमाविषयत्वेपि नातिप्रसंगः अन्यथा हि ह्रासंबंधेनैव तद्द्वत्त्वं बोध्यं अथ ज्ञायमा
नपक्षनिष्ठसाध्याभावत्वादिना बाधादिदोषाणां प्रतिबंधकतानसंभवति साध्याभावत्वादिना पदा
र्थांतरस्यैव यत्र ज्ञानं तत्र दोषाणामज्ञायमानतया विरोधित्वेनानुमित्यापत्तेः किंतु ज्ञानीयपक्षतावच्छे
दकावच्छिन्नविषयतानिरूपितसाध्याभावत्वावच्छिन्नविषयतावत्त्वेन तादृशविषयतया ज्ञानविशिष्ट
त्वेन वा तत्स्वरूपं तादृशभ्रमविषयपदार्थांतरसाधारणमेवेति तेषामेव भ्रमदशायां विरोधित्वान्नोक्ता
पत्तिः एवं च सद्धेतूनामपि प्रतिबंधकतावच्छेदकनिरूकविषयताश्रयवद्भावादिप्रमाविशेष्यत्वात्
अतिव्याप्तिरिति चेन्न यद्रूपावच्छिन्नविषयतासामान्यं प्रकृतानुमितिप्रतिबंधकतावच्छेदकं तद्रूपविशि
ष्टप्रकारकप्रमाविशेष्यत्वमेव विवक्षणीयं ह्रदो वह्निमान् धूमात् इत्यादौ न तादृशरूपं ह्रदवृत्ति
वह्न्यभावत्वादिकं ह्रदे वह्निर्नास्तीत्यादिज्ञानानिरूपिततद्रूपावच्छिन्नविषयतासामान्यस्यैव ह्रदत्ता

वच्छिन्नविषयतानिरूपितवह्न्यभावत्वावच्छिन्नविषयताशालिदोषनिष्ठानुमितिप्रतिबंधकतायामवच्छेदक
१२ त्वात्सद्धेतुस्थले च केवलवह्न्यभावत्वादिकं न तथा तद्वच्छिन्नविषयतासामान्यान्तर्गतधर्म्मविषयक
ज्ञाननिरूपिततादृशविषयतानामनुमितिप्रतिबंधकतानवच्छेदकत्वात् पर्वतविशिष्ट[illegible]
वह्न्यभावत्वादिविशिष्टं च न किंचिद्वस्तु प्रसिद्धमिति नातिप्रसंगः तृतीयमपि लक्षणमन्यथैव रीत्याप
रिष्कार्यं यद्यप्यस्य दुष्टहेतुलक्षणत्वे ज्ञायमानदोषप्रतिबंधकताभिमतानाश्रयणेपि तद्रूपाव
च्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबंधकप्रमाविषयतद्धर्मतावच्छेदकवत्त्वं तद्रूपावच्छिन्नपक्ष
साध्यहेतुस्थले तेन रूपेण दुष्टत्वमित्यर्थकतामुपगम्य यथार्थपदसार्थक्यमुपपादयितुं शक्य १२
ते तथापि दुष्टलक्षणस्य दोषघटितत्वानुरोधेन तन्मतमवलंब्य षष्ठीसमास आदृत इति ननु
द्वितीयतृतीयलक्षणयोर्दोषे अतिव्याप्तिरव्याप्तिश्च क्वचिद्धेतौ यत्पदेन दोषस्यैव उपादेयतया

तत्तस्य तन्मात्रवृत्तित्वादत आह तत्त्वमित्यस्येति प्रथममात्रस्य दुष्टहेतुलक्षणत्वेनैवोपपत्तौ चरम
योर्दोषलक्षणत्वमेवोचितं तत्त्वमित्यस्य यथाश्रुतार्थकतानुरोधादत्र तथैवाह आद्यस्यैवेति दु
ष्टत्वव्याख्याया निर्दोषत्वादाहुरित्युक्तं लिंगज्ञानस्येति मूले लिंगांशस्य निष्प्रयोजनकतया
तस्य विवक्षितत्वमाह लिंगमिति यद्विषयकत्वेनेत्यत्र तृतीयाया अवच्छेदकत्वं तच्चेहानतिरि
क्तवृत्तित्वमिहाग्रे निवेश्यते तदा असंभवः विशिष्टस्यानतिरिक्ततया वह्न्यभावविशिष्टह्र
दादिरूपदोषविषयकत्वस्य शुद्धह्रदत्वाद्यवच्छिन्नविषयकज्ञानेपि सत्त्वेनानुमितिप्रतिबंध
कतानतिरिक्तवृत्तित्वादतः स्वरूपसंबंधरूपमेव तद्वाच्यं तथा च पर्वतो वह्निमानित्याद्यनुमिति
प्रतिबंधकभ्रमविषयवह्न्यभावादावतिव्याप्तिस्तद्विषयकत्वस्यापि प्रतिबंधकतावच्छेदक
घटकत्वात् असंभवभयेन चावच्छेदकतापर्याप्तिनिवेशोऽपि न वादतो यद्विषयकत्वेनेति पदं
स

व्याप्त्येतादृशविशिष्टविषयकत्वेनेति यादृशविशिष्टविषयकत्वेन यद्रूपावच्छिन्नविषयताकत्वेन एवं
रूपवत्त्वमित्यस्य तद्रूपावच्छिन्नत्वमित्यर्थः व्याख्याबीजं प्रकाशयति तेनेति यत्प्रकारकत्वेन प्रतिबंध
कत्वमित्युक्तौ पक्षविशेषणकभ्रममादाय वह्न्यभावादेरनतिप्रसंगः पर्वतादावतिप्रसंगसंभवेऽपि य
त्संबंधावच्छिन्नयन्निष्ठप्रकारताकत्वेन अनुमितिप्रतिबंधकत्वं तेन संबंधेन तद्वत्त्वस्य दुष्टताव्यवहार
नियामकत्वोपगमे पर्वतविशेषणकवह्न्यभावज्ञानस्य विशेषणताविशेषावच्छिन्नाधेयतासंसर्गा
वच्छिन्नपर्वतादिनिष्ठप्रकारताकत्वेन प्रतिबंधकत्वात्तेन संबंधेन पर्वतादिमत्त्वायाः पर्वतमहानसा
न्यतरत्वादिरूपसद्धेतौ सत्त्वेऽपि प्रसिद्धधूमादिरूपहेतावसत्त्वात्तत्र दुष्टताव्यवहारापत्तेरयोगादेतत्त
दनुरोधेन पक्षविशेष्यकेत्युक्तं भ्रमपदं निश्चयसामान्यपरं तेन सद्धेत्वादौ सादिपदग्राह्यसाध्य
शून्यपक्षकदुष्टहेतावनुमितिप्रतिबंधकप्रमाविषयसाध्याभावादेरसत्त्वेऽपि नातिप्रसंगः नातिप्रसं
गादित्युक्तव्याख्याने अनतिरिक्तवृत्तित्वरूपमेव अवच्छेदकत्वं विवक्षणीयं विशेषणीभूतवह्न्यभावा

द्यविषयके सुद्धहृदत्वादिना वह्न्यभावविशिष्टहृदादिविषयकज्ञाने वह्न्यभावविशिष्टहृदत्वाद्यवच्छिन्न
विलक्षणविषयतानिरूपकत्वस्यासत्त्वेनोक्तासंभवानवकाशात् तथा च केवलवह्न्यभावत्वाद्यवच्छिन्न
विषयकत्वस्य प्रतिबंधकत्वानतिरिक्तवृत्तित्वान्नातिप्रसंगः इत्यर्थः ननु स्वरूपसंबंधरूपावच्छेदकत्व
निवेशे अयमेवातिप्रसंगो दुर्वारः अप्रामाण्यज्ञानाभावादिविशिष्टयद्रूपावच्छिन्नविषयकनिश्चय
त्वं प्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणमित्येतादृशविवक्षायां तादृशातिप्रसंगवारणे पुनर
संभवः वह्न्यभावत्वादिना घटाद्यवगाहिना वह्न्यभाववान् हृद इत्यादिज्ञानस्यापि प्रतिबंधकतया त
त्साधारण्यानुरोधेन वह्नित्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारतानिरूपितहृदत्वावच्छिन्न
विशेष्यताकनिश्चयत्वेन प्रतिबंधकतया वक्तव्यतया वह्न्यभावविशिष्टहृदत्वाद्यवच्छिन्नविषय
तायाः तादृशप्रकारतानिरूपितहृदत्वावच्छिन्नविषयतात्वेनावच्छेदकत्वेऽपि अप्रामाण्यज्ञाना
भावादिविशिष्टवह्न्यभावविशिष्टहृदत्वाद्यवच्छिन्नविषयताकनिश्चयत्वस्यावच्छेदकतापर्या

ष्यानधिकरणत्वात् इत्यत्र तृतीयाया अनतिरिक्तवृत्तित्वरूप अवच्छेदकतार्थकत्वं स्फुटयति अवच्छेदकत्वं चे
ति इहलक्षणेघटकत्वं सप्तम्यर्थः नच विशिष्टदोषविषयकत्वस्याप्रतिबंधकसंशयादेरसत्त्वात्पु
नरसंभव इति वाच्यं ज्ञानस्येत्यत्र ज्ञानपदं अनाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयपरं षष्ठ्यर्थ
श्चाधेयत्वं तस्य यद्विषयक अन्वयः एवं च तादृशनिश्चयवृत्तित्वविशिष्टयादृशविशिष्टविषय
त्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्ति तादृशत्वस्य विवक्षितत्वीयतया असंभवानवकाशात् अ
नतिरिक्तवृत्तित्वं च स्वव्यापकत्वकत्वं ननु तच्छून्यावृत्तित्वं विशिष्टस्य विशेष्यभिन्नत्व विशिष्टविष
यकत्वानतिरिक्ततया तस्यातिप्रसक्तत्वे विशिष्टे तस्मिन्नतिप्रसक्तत्वस्य दुर्घटत्वात् यत्तु प्रति
बंधकताशून्यतादृशनिश्चयावृत्तित्वमेव अनतिरिक्तवृत्तित्वमतो नोक्तरीत्या असंभव इति तद १४
सत् तथा सति मुक्तोपात्तस्य ज्ञानस्येत्यस्य वैयर्थ्यप्रसंगात् ह्रदत्वाद्यवच्छिन्नायावह्न्यभाव
विशिष्टह्रदत्वाद्यवच्छिन्नविषयकयत्किंचिज्ज्ञानीयविषयतातन्निरूपितकत्वस्य प्रतिबंधकत्वा

शून्यतादृशनिश्चयावृत्तित्वेन गुरुह्रदत्वावच्छिन्ने अतिप्रसंगाच्च अस्मन्मते अनुमितिप्रतिबंधकतायाः
तादृशनिश्चयवृत्तित्वविशिष्टह्रदत्वाद्यवच्छिन्नविषयताकत्वत्वाद्यवच्छिन्नव्यापकताविरहादतिप्र
संगानवकाशात् अथैवमपि जातित्वादिना ह्रदत्वादिविषयकस्य जातिमान्वह्न्यभाववान् इत्यादिज्ञान
स्यापि वह्न्यभावविशिष्टह्रदत्वाद्यवच्छिन्नविषयकतया तस्य च ह्रदो वह्निमानित्यनुमितिविरोधित स
या असंभवः जलवान्वह्निमानित्यादिस्थलीयदोषासंग्रहे याविशेषितधर्मावच्छिन्नपक्षादिक
शि स्थलीयस्यापि किंचिद्विशिष्टत्वघटितदोषस्यासंग्रहेण च पक्षतावच्छेदकांशे अन्याप्रकारकत्वनिवे
शस्यावश्यकत्वात् तादृशविशिष्टाघटकपदार्थाविषयकत्वस्य ज्ञानविशेषणत्वे सर्वमाकाशवदित्या
य दिस्थलीयबाधादेरतद्घटकाप्रसिद्ध्या अव्याप्तिः यद्रूपावच्छिन्नस्य यस्य यस्य यादृशविषयता
भिन्नकिंचिदवच्छिन्नविषयिताशून्यत्वं ज्ञाने निवेश्यं जातित्वाद्यवच्छिन्नस्य च ह्रदत्वादेर्न वह्न्यभावह्र
दत्वाद्यवच्छिन्नात्मकदोषघटकतेति जातित्वाद्यवच्छिन्नह्रदत्वादिविषयतातादृशविषयिताभि

विशिष्टघटकता तद्रूपावच्छिन्नत्वे निष्ठ ३
त

नैव न शून्यत्वं च नोक्तज्ञानस्येत्यपि न सत् तथासति ह्रदो जलाभाववानित्यादिस्थलीयबाधादेरेव दुःसंगत
त्वात् जातित्वादिना ह्रदत्वादिरूपधर्मितावच्छेदकावगाहिनो जातिमान् जातिमानित्यादिज्ञानस्य जा
तित्वाद्यवच्छिन्नह्रदत्वनिष्ठधर्मितावच्छेदकतारूपविषयतायां निरूपकविषयताभिन्नत्वविरहेण
तादृशज्ञानस्यानुमितिप्रतिबंधकस्य शून्यत्वात् तेनावारणात् मैवं यद्रूपावच्छिन्नविषयितात्वं तादृ
शविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयिताशून्य
स्य ज्ञानविशेषणतया सामान्यस्यात् अप्रतिबंधकज्ञानविषयतावच्छेदकजातित्वादिविशेषितह्रदत्वा
दिघटिततद्रूपावच्छिन्नविषयितात्वावच्छिन्नाभावस्य हादात्मकशिष्टविषयितासमानाधिकर
णत्वात् तज्ज्ञानव्यावृत्तिरिति विशिष्टस्य विशिष्टविषयकत्वस्य असत्त्वेपि तत्त्वाभावत्वादिनाव
च्छवगाहि भ्रमे असत्त्वेपि तथा च विशिष्टविषयकत्वेन प्रतिबंधकतान संभवतीति भावः भ्रमात्प्र १९
तिबंधेपि तादृशभ्रमस्यानुमित्यनुत्पादप्रयोजकत्वेपि न क्षतिः नोक्तयुक्त्या पर्याप्तिनिवेशः संभवः

वच्छदकत्वा

तदनिवेशे पूर्वोक्तातिप्रसंगो वा न तु विशिष्टदोषघटकीभूततदेकदेशविषयितायां स्वरूपसंबंधरूपावच्छेदकत्व
सत्त्वेपि विशिष्टविषयितासामान्यस्य तादृशावच्छेदकत्वविरहस्य अतिप्रसंगवारणसंभवात् तदेव
कथं न विवक्षितमिति न च सामान्यपदस्य व्यापकत्वार्थकतया प्रतिबंधकतायां विशिष्टविषयितात्वव्यापकत्वमपे
क्ष्यं हेतपक्षया प्रतिबंधकतायां विशिष्टविषयिताव्यापकत्वनिवेशनमेवोचितमिति वाच्यं यतो वह्न्यभाव
विशिष्टह्रदादिनिरूपितविषयता जनुमित्यप्रतिबंधकसंशयाहार्याप्रामाण्यज्ञानास्कंदितज्ञानसाधार
णतया नानुमितिप्रतिबंधकतायाः तद्व्यापकत्वमित्यनाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयत्वनि
त्वविशिष्टयावद्विशिष्टविषयितायाव्यापकत्वं प्रतिबंधकतायामवतावश्यं विरक्षणीयं तदपेक्षया
लाघवेन स्वरूपसंबंधरूपावच्छेदकतायां बाधादिरूपदोषविशिष्टविषयितात्वव्यापकमेव विवक्षितुमु
चितं तथा सति निश्चयत्वाद्यनिवेशात् समानाधिकारकज्ञानेषु विषयितायामेदस्याप्रामाण्यिकत
अपि यासंशयादिज्ञानीयविषयितायां जैनिश्चयत्वादिविशिष्टीभूतया प्रतिबंधकतावच्छेदकतया प्रति
य

साधारणी तादृश आहार्यज्ञाने

बंधकतावच्छेदकतायां बाधधीविशेषनिरूपितविषयितात्वव्यापकतायाः असत्त्वात् तत्त्वं च वह्न्यभाववान्
१६ ह्रदो वह्निमानित्याहार्यज्ञानीयवह्न्यभावविशिष्टह्रदादिविषयितानां अनाहार्यज्ञानेऽसमानाधि
करणकानां हार्यज्ञानाप्रसिद्धेः ह्रदो वह्न्यभाववानित्याद्यनाहार्यज्ञानीयवह्न्यभावविशिष्टह्रदादिवि
षयितानां वह्न्यादिप्रकारतानिरूपिततादृशाहार्यज्ञानीयविशिष्टह्रदादिविषयितायाश्च भिन्नत्वा
त् तथा चानाहार्यत्वविशिष्टविषयिताया एव प्रतिबंधकतावच्छेदकतया नैर्शितादाहार्यज्ञानीय
विषयितासाधारण्यविशिष्टविषयितात्वव्यापकत्वमिति वाच्यं एवं सत्यनाहार्यज्ञानीयविशि ८
ष्टविषयितात्वव्यापकताया एवाविवक्षणीयत्वात् तावतापि संशयान्यत्वाप्रामाण्यज्ञानाना
स्कंदितत्वयोरप्रवेशेन लाघवात् न यावता मेवं स्वरूपसंबंधरूपावच्छेदकत्वप्रवेशे पाषाणमयत्वा
द्यवच्छेदेन वह्न्यभाववत्तानिश्चयविशिष्टस्य पाषाणमयत्वविशिष्टपक्षादेः ज्ञानस्य वह्न्याद्य १६
नुमितिप्रतिबंधकतया तदवच्छेदके विषयिताकपाषाणमयत्वादिविशिष्टपक्षादावतिव्याप्तिः

नतिरिक्त

रत्नित्वरूपअवच्छेदकत्वनिवेशमते तादृशविशिष्टविषयितायाः पाषाणमयत्वाद्यवच्छेदेन वह्न्यभाववत्ता
निश्चयाविशिष्टज्ञानसाधारण्यतया अनुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वेन अतिप्रसंगानवकाशात्
रि न च अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वविवेशेऽपि जलाद्यवच्छेदेन वह्न्याद्यभाववत्ताघटितस्य वह्न्याद्यभा
ववज्जलादिमद्वृत्तिजलादिविशिष्टस्य ह्रदादिरूपपक्षस्य जलवान् वह्न्यभाववानित्यादिज्ञानसहित
स्य जलवांश्च ह्रद इत्यादिज्ञानस्य तादृशज्ञानविशिष्टतादृशज्ञानत्वेनैव प्रतिबंधकतया तादृशप्रतिबंधकता
शून्यज्ञानाविषयस्य सत्प्रतिपक्षाघनात्मकस्य वारणाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबंधकता
यामवश्यं निवेशनीयतया अस्मन्मतेऽपि तत्र नातिप्रसंग इति वाच्यं ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबंध
कताविशेषणत्वे प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणतद्धेतुमत्पक्षरूपसत्प्रतिपक्षे व्याप्तिः
साध्याभावांशे तद्व्यापकताग्रहविशिष्टतद्धेतुज्ञानत्वेन स्वतंत्र साध्याभावधर्मिकतद्व्यापकताग्र

हविशिष्टतद्वत्ताज्ञानसाधारण्यानुरोधेन अवश्यक्लृप्तप्रतिबंधकत्वेनैवोपपत्तेः तादृशविशिष्टज्ञानस्य ज्ञानवैशिष्ट्या
१७ नवच्छिन्नप्रतिबंधकतांतरे मानाभावात् उक्तविशिष्टे अतिप्रसंगस्तु विवक्षणीयविशिष्टांतराघटितत्वविवक्ष
यैनैव वारणीयः नन्वज्ञानद्वयसाधारणप्रतिबंधकतायाः प्रत्येकज्ञानविषयविशिष्टविषयकत्वं नानतिरिक्त
वृत्तित्वरूपजवच्छेदकतावत् तथा च दर्शितविशिष्टघटकस्य प्रत्येकज्ञानविषयस्य न निरुक्तविशिष्टात्मकतेति निरु
विशिष्टांतराघटितत्वं उक्तविशिष्टस्याक्षतमेवेति वाच्यं वक्ष्यमाणविशिष्टांतराघटितत्वस्यैव यादृशविशिष्ट
विषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्ति तादृशवि
शिष्टद्वयाघटितत्वे सति यादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्ति तादृशवि
शिष्टांतराघटितत्वरूपतया उक्तविशिष्टवारणसंभवात् न चैवमुक्तसत्प्रतिपक्षे व्याप्तिः तस्य प्रतिहेतुव्याप
कताविशिष्टसाध्याभावप्रतिहेतुविशिष्टपक्षात्मकनिरुक्तविशिष्टद्वयघटितत्वादिति वाच्यं सत्प्रतिपक्ष १७
घटकतादृशविशिष्टद्वयविषयताभिन्ननिरुक्तविशिष्टद्वयविषयिताशून्यप्रतीतिविषयत्वस्य विशिष्टद्वया

ता घटितैर्थत्वाव यत्र सत्प्रतिपक्षाप्रसिद्धिस्तत्र भिन्नांतमनुपादेयमेव साध्यादिभेदेन लक्षणभेदात् प्रमात्मकज्ञानी
यविषयितासाधारणरूपेणैव वाप्रसैतिहेतुव्यापकताविशिष्टसाध्याभावादिविषयतापाद्येया न च दर्शितविशि
ष्टस्य सत्प्रतिपक्षरूपता न स्वीक्रियते अपितु हेतुतावच्छेदकाघटितसाध्याभावाभाववद्वृत्तिमत्पक्षात्मकवि
शिष्टस्यैव व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टहेतुमत्पक्षस्योक्तरीत्या संग्रहे तद्धर्मव्यापकसाध्याभाव
कालिनतद्धर्मविशिष्टपक्षादिव्यावृत्तिरशक्या स्यादित्यविशेषेण व्यापकताघटितविशिष्टमात्रस्य अलक्ष्यता
या एवयुक्तत्वात् तथा चोक्तप्रयासमुपेक्ष्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानिवेशनमेवोचितमिति वाच्यं
एवमपि प्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वघटितस्य प्रत्यभेदेना साधारण्यविरोधरूपस्य
विषयितायाः पक्षधर्मिकप्रकृतहेतुमत्ताज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतायामेव अवच्छेदकत्वात् प्रतिबं
धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य निवेशासंभवात् दर्शितातिप्रसंगवारणाय निरुक्तविशिष्टद्वयाघ
टितत्वस्यैव निवेशनीयत्वात् न च पक्षवृत्तित्वविशेषितप्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगि

त्वमेव असाधारण्यादिरूपं वाच्यं पक्षवृत्तित्वाघटितविशिष्टविषयितायाः अप्रतिबंधकज्ञानसाधारणतयाप्रतिबं
१८ धकतानवच्छेदकत्वात् तादृशस्य च असाधारण्यादेः पक्षवृत्तित्वविशिष्टप्रकृतहेतुसाध्यव्यापकाभावप्रतियो
गित्वविशिष्टप्रकृतहेतुरूपनिरुक्तविशिष्टद्वयघटिततयानिरुक्तविशिष्टद्वयाघटितत्वनिवेशोऽपिनसंभव
तीति वाच्यं पक्षवृत्तित्वाघटितविशिष्टस्यैव असाधारण्यरूपतयाविरोधोऽपिफलतःप्रतिरोधएवतदन्यत्वे
नवाविरोधिविशेषणीयमितिपंक्तिव्याख्यानावसरेसंपादनीयत्वात् ननु अनतिरिक्तवृत्तित्वरूप अवच्छे
दकत्वनिवेशे व्यभिचारादिघटितपदार्थांतरेणअतिव्याप्तिः तद्विषयकत्वस्यापिप्रतिबंधकतानतिरि
क्तवृत्तित्वात् अतआह विशेषणीयाचेतितादृशलक्षणंचेतिशेषः तादृशविशिष्टेति अनुमितिप्रतिबं
धकतायांयद्रूपावच्छिन्नविषयकत्वमवच्छेदकंतद्रूपावच्छिन्नेत्यर्थः व्यभिचारत्वावच्छिन्नस्यव्यभिचारत्वा
दिरूपतादृशरूपावच्छिन्नघटितत्वादसंभवइत्यतोऽन्तरेतिस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छे १८
दकावच्छिन्नार्थकं अतःशुद्धव्यभिचारादेः मेयत्वविशिष्टव्यभिचाराद्यभिन्नत्वेऽपिनक्षतिः तदघटितं

तत्वं तदविषयकप्रतीतिविषयित्वं एवं चानुमितिप्रतिबंधकतायांयादृशरूपावच्छिन्नविषयकत्वमवच्छेदकंतादृशंय
त्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकंतदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकंयत्वंतदवच्छिन्नत्वं
समुदितार्थः यद्रूपावच्छिन्नेलक्षणंसंगमनीयंतदेवस्वपदार्थः भवतिहिव्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीति
विषयतावच्छेदकीभूतायेबाधत्वादयःतदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं व्यभिचारत्वादिकमितितदव
च्छिन्नेलक्षणसंगतिः मेयत्वविशिष्टव्यभिचारत्वादेःस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकव्यभिचारत्वा
द्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वाभावात् नतदवच्छिन्नेतिव्याप्तिः मेयत्वविशिष्टव्यभिचारादेरपि
मेयत्वादिनाव्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयत्वान्नदोषःस्यादतः तादृशरूपाश्रयधर्मिणांतदवच्छि
न्नाविषयकप्रतीतिविषयत्वेनविशेष्यत्वमेवतादृशविषयतावच्छेदकत्वेन विवक्षितंमेयत्वविशिष्टव्यभिचा
रत्वाद्याश्रयाविषयकत्वस्यव्यभिचारत्वाद्यवच्छिन्नविषयकप्रतीतौदुर्घटत्वान्नदोषःस्यादतःस्वाश्रया
विषयकत्वमुपेक्ष्यस्वावच्छिन्नाविषयकत्वनिवेशःस्वावच्छिन्नाविषयकप्रतीतिविषयवृत्तित्वस्यतादृश

धर्मविशेषणत्वे व्यभिचारत्वादेरपि मेयत्वादिनाव्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषये व्यभिचारादौ वर्तमा
१९ नत्वात् असंभव इत्यतस्तादृशविषयतावच्छेदकत्वेन धर्मो विशेषितः प्रमेयं गगनवद्वाच्यत्वादित्यादौ व्यभिचारत्वा
द्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यद्गगनाभाववन्मेयत्वादि तदाश्रयाविषयकप्रतीत्यप्रसिद्ध्या अव्या
प्तिरतस्तदवच्छिन्नविषयकत्वनिवेशः अत्र च तादृशविशिष्टांतराविषयकप्रतीतिविषयतावच्छेदकत्वस्य दोष
तावच्छेदकधर्मविशेषणतायां तथाज्ञानस्येत्यत्र ज्ञानपदार्थे तादृशविशिष्टांतरविषयकत्वनिवेशो नोचितः एवं च
निश्चयत्वस्य व्यापकत्वे यद्विषयकनिश्चयस्येत्यत्र निश्चय एव तन्निवेश्यं लाघवादित्यवधेयं अथ धूमव्यभिचारि
वह्निमान् धूमवान् वह्नेरित्यादौ बाधादेर्व्यभिचारादिघटिततया तत्राव्याप्तिः न च यद्रूपावच्छिन्नाविषयकत्वं तत्ता
वच्छिन्नाविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकं तादृशरूपांतरावच्छिन्नाघटितत्वस्य विवक्षितत्वा
न्न दोषः व्यभिचारस्योक्तबाधविषयत्वात् न्यूनवृत्तिव्याप्तिज्ञानप्रतिबंधकतावच्छेदकविषयताकत्वेऽपि तादृशप्र
तिबंधकतासामान्यांतर्गतानुमितिप्रतिबंधकतावच्छेदकविषयिताकत्वाभावेन उक्तबाधस्य तद्घटितत्वेऽपि नि १९

रूपकविशिष्टांतराघटितत्वात् तदेतरितिवाच्यं व्यभिचारित्वादिरूपत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छे
दकविषयितानिरूपकतावच्छेदकस्य तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्य अप्रसिद्ध्या असंभवात् व्यभिचा
रत्वमेयत्वविशिष्टव्यभिचारत्वादेरेव तथाविधविषयतानिरूपकतावच्छेदकत्वात् तस्य च व्यभिचारत्वाद्यवच्छिन्ना
विषयकप्रतीतिविषयतावच्छेदकत्वाभावात् न च स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकविष
यितानिरूपकतावच्छेदकः कश्चित्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यस्य एवंभूतं यद्यत्वं प्रमेयत्ववि
शिष्टव्यभिचारत्वादि तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य विवक्षणीयतया न दोष इति वाच्यं तथा
सति धूमव्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादौ बाधत्वाद्यवच्छिन्नघटकतावच्छेदकस्य धूमव्यभिचारिवह्नि
मत्त्वादेः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूतस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकता
सामान्यावच्छेदकविषयितानिरूपकतावच्छेदकव्यभिचारत्वकत्वाद्व्याप्तेरुर्व्वारत्वात् न च स्वावच्छिन्नविषय
कत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतस्वावच्छिन्नविषयितानिरूपकविशिष्टनिरूपितयत्किंचिद्रूपशित्वया

यादृशयादृशधर्मावच्छिन्नानिरूपितं तादृशतादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं यत्त्वं तद्धर्मावच्छिन्नत्वमे
२० वसमुदितलक्षणार्थः मेयत्वविशिष्टव्यभिचारत्वाद्यवच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतायाः शुद्धव्यभिचा
रत्वाद्यवच्छिन्ननिरूपितविषयतायाः मेयत्वविशिष्टव्यभिचारत्वाद्यवच्छिन्नानिरूपितत्वेन तादृशविशिष्टव्यभिचा
रत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य स्वभिन्नसत्त्वेन मेयत्वविशिष्टव्यभिचारत्वादेः स्वपदेनोपा
दातुमशक्यत्वात् व्यभिचारत्वादिविशिष्टविषयकत्वाद्यवच्छिन्नप्रतिबंधकतासामान्यावच्छेदिकायाः कस्या अ
पि विषयितायाः व्यभिचारत्वादिविशिष्टानिरूपितत्वासंभवात् तादृशविषयितायां यादृशधर्मविशिष्टानिरूपि
तत्वं घटत्वयत्त्वविशिष्टव्यभिचारत्वादेरेव तादृशत्वान्तरवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकतया व्यभिचा
रत्वादेः स्वपदेनोपादातुंशक्यत्वान्न कश्चिद्दोषः अथवा यद्धर्मावच्छिन्नाविषयकत्वावच्छिन्नप्रतिबंधकतासामान्या
वच्छेदकीभूतविषयितात्वं यद्धर्मावच्छिन्ननिरूपितत्वव्याप्यं तद्धर्मवत्त्वमेव समुदितार्थ इति वाच्यं बाधविशिष्टव्य
भिचारत्वाद्यवच्छिन्ने अतिप्रसंगात् तादृशधर्मावच्छिन्नविषयकत्वावच्छिन्नबाधज्ञानप्रतिबंधकतायां केवलव्य २०
भिचारविषयतायाः तादृशव्यभिचारज्ञानप्रतिबंधकतायां च केवलबाधविषयिताया अनवच्छेदकत्वेन बाधवि

शिष्टव्यभिचारत्वाद्यवच्छिन्नविषयताया एव तथाविधप्रतिबंधकतासामान्यावच्छेदकत्वं तस्याश्च तादृशविशिष्टनिरूपितत्व
स्य आवश्यकत्वात् प्रथमकल्पे स्वपदेन चरमकल्पे यत्पदेन तस्योपादानसंभवात् अथ वह्न्यभावादिधर्मितावच्छेदके
पर्वतादिप्रकारकबुद्धेरिव धूमव्यभिचारविशिष्टवह्न्यादिधर्मितावच्छेदककस्य धूमव्याप्यतया वह्न्यादिप्रकारकमद
स्य अनाहार्यस्यासंभवेन तादृशपक्षतावच्छेदकावच्छिन्नपक्षकसमूहालंबनानुमितेरेवाप्रसिध्या तादृशानु
मितिप्रतिबंधकताघटितयथाश्रुतलक्षणस्य तद्रूपावच्छिन्नपक्षकवह्न्यादिपक्षकेहेतुके दोषाव्याप्तिः
स्वयमेव वक्ष्यत इति तद्वारणाया सार्थक्येति चेत् भवतु तावदेवं तथापि विशेषगुणवद्भिन्नो घटो गुणसा
मान्यवद्भिन्नः इत्यादौ दर्शितसमूहालंबनानुमितिप्रसिध्या विशेषगुणवद्घटादिरूपाश्रयासिद्धेः गुणव
द्घटादिरूपबाधघटितायाः संग्रह आवश्यकः यदि च तत्र घटत्वावच्छेदेन गुणवत्त्वमेव बाधः आश्रयासिद्धि
श्च घटत्वसमानाधिकरण्येन घटत्वावच्छेदेन वा विशेषगुणवत्त्वं तस्याश्च गुणत्वरूपसामान्यधर्मावच्छि
न्नघटत्वव्यापकताघटितोक्तबाधस्य न प्रवेशः विशेषगुणत्वेन घटत्वव्यापकतायाः तत्र प्रवेशेऽपि सामा
न्यरूपेण व्यापकतायाः तदनंतर्भावादिति न तादृशासिध्यसंग्रहप्रसंग इत्युच्यते तथापि विशेषगुणाभाववान्नहि

तीयलक्षणावच्छिन्नो घटः गुणसामान्याभाववानित्यादौ द्वितीयलक्षणावच्छिन्ने घटे विशेषगुणवत्त्वरूपाश्रयासिद्धान्तरस्यापि
२१ न्ने घटे गुणवत्त्वरूपबाधप्रवेशस्य आवश्यकत्वात् यथाश्रुतलक्षणे च तत्संग्रहस्यावश्यकतया केविशेषणदानानुपप
त्तिः वस्तुतस्तु अत्र वदंतीत्यादिनिष्कृष्टकल्पे मेयत्वविशिष्टव्यभिचारादिवारणाय विशिष्टान्तराघटितत्वस्यानि
वेशनीयतया तन्मते दर्शितबाधाद्यसंग्रहदोषएव तेन स्वावच्छिन्नविषयित्वावच्छिन्न यत्किंचित्प्रतिबंधक
तावच्छेदकविषयिताक विशिष्टनिरूपितविषयितात्वव्यापकस्वावच्छिन्ननिरूप्यताकधर्मवत्त्वं समुदितल
क्षणार्थः मेयत्वविशिष्टव्यभिचारत्वादिकं नैतादृशं स्वं तदवच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतावच्छेदकवि
षयिताकशुद्धव्यभिचारादिविषयितात्वस्य तदवच्छिन्ननिरूप्यत्वाव्याप्यत्वात् उक्तस्थले विशेषगुणविशिष्टघ
टादिरूपाश्रयासिध्यादिविषयकत्वावच्छिन्नविशिष्टपक्षकहृदादिनिरूपितयत्किंचित्प्रतिबंधकतावच्छे
दकविषयिताकविशिष्टनिरूपितविषयितात्वस्य तादृशाश्रयासिध्यादिनिरूपितत्वव्याप्यत्वात् तत्र लक्षण
समन्वयः प्रतिबंधकतायां यावत्त्वानिवेशान्नोक्तरीत्या बाधविशिष्टव्यभिचारादावतिप्रसंगः स्वावच्छिन्ना
निरूपितविशिष्टविषयित्वानवच्छिन्नप्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयिताकायाधर्मः तद्वत्त्वं वासमु २३

दितलक्षणार्थः मेयत्वविशिष्टव्यभिचारत्वादिकं नैतादृशं स्वं तदवच्छिन्नानिरूपितशुद्धव्यभिचारत्वाद्यवच्छिन्नविष
यितावच्छिन्नायामेव प्रतिबंधकतायां तदवच्छिन्नविषयितायाः अवच्छेदकत्वात् उक्तस्थले च आश्रयासिद्धिविष
यकत्वस्य तदनिरूपितबाधविषयितानवच्छिन्नायाः विशिष्टपक्षकहृदनिरूपितप्रतिबंधकतातदवच्छेदकत्वा
त् लक्षणसमन्वयः इति परास्तं यद्विषयकनिश्चयस्य विरोधिविषयिताप्रयुक्तइत्यादिनिष्कृष्टकल्पे अनुमिति
प्रतिबंधकतायाः अघटकत्वात् प्रतिबंधकतायां विशिष्टान्तरविषयकत्वानवच्छिन्नत्वविशेषणदानस्य
असंभवेन यत्पदार्थस्यैव तादृशपदार्थान्तराघटितत्वेन विशेषणीयतया तद्बाधव्याप्ते अवश्यपरिहा
रत्वात् अत्र केचित् स्वसजातीयविशिष्टान्तराघटितत्वमेव यत्पदार्थविशेषणं देयं साजात्यं च हेत्वाभास
विभाजकरूपेण तच्च रूपं बाधत्वव्यभिचारत्वादितेन रूपेण व्यभिचारादेर्न बाधादिसाजात्यमिति व्यभि
चारघटितबाधादौ नाव्याप्तिः न चैवं यद्विषयकनिश्चयस्य विरोधिविषयताप्रयुक्तोभयाभावः तत्त्वं स्व
त्र विरोधिविषयिताप्रयुक्तत्वस्य स्वेल वैयर्थ्यं घटादेस्तादृशरूपेण सजातीयत्वाप्रसिध्येव अतिप्रसंगवारणादि
ति वाच्यं स्वसजातीयविशिष्टान्तराघटितं यत्स्वं तद्विषयकप्रतीतिविषयत्वस्य विवक्षयानुयोगिनि

स्त्वान्तर्भावेनपदार्थांतरेचातिप्रसंगवारकतयातद्दलसार्थकत्वात्नचव्यभिचारविशिष्टमेयत्वादेर्हेत्वाभासत्व
विरहात्हेत्वाभासविभाजकरूपेणतत्सजातीयाप्रसिध्यातस्यस्वपदेनउपादातुमशक्यतयामेयत्वविशिष्टव्य
भिचारादिकमेवस्वपदेनउपादेयंतस्यशुद्धव्यभिचाराद्यभिन्नतयाव्यभिचारत्वादिरूपहेत्वाभासविभाजकरूपेण
त तत्सजातीयप्रसिद्धेरितितैर्दविषयकप्रतीतिविषयत्वस्यव्यभिचारादिविशिष्टमेयत्वादौसत्वात् तत्रातिप्रसंगइतिवा ति
च्यंविशिष्टांतराघटितत्वेनाघटितस्यसाध्यसाधनभेदाविरोधिज्ञाननिष्ठविषयितासंबंधेनव्याप्तिमद्भप्रति
बंधकतानतिरिक्तवृत्तित्वादिरूपस्यव्यभिचारादिविभाजकस्यात्रनिवेशात्तादृशरूपस्यचव्यभिचारादिविशिष्ट
मेयत्वादिसाधारणत्वादित्याहुः तन्नव्यभिचारादिघटितबाधादावपिविशिष्टांतराघटितबाधघटितव्यभिचारत्वा
दिसत्वेनतद्घटकव्यभिचारादेर्व्यभिचारत्वादिनातत्सजातीयतयातत्संग्रहानुपपत्तेः इदमत्रावधेयंप्रतियोगिनिस्व
स्वांतर्भावेनैणतादृशलक्षणकरणेपिव्यभिचाराचघटितबाधादावव्याप्तिवारणमशक्यमेवतत्रसजातीयविशि
ष्टांतरघटितंयत्त्वंधूमव्यभिचारिवह्निमत्वंतद्घटितत्वस्यतद्घटितबाधादावसत्वासत्वात् यदिचतद्घटितत्वं
तद्पर्याप्तिविषयतायोऽत्यधिकरणत्वंतत्त्वंसुघटमेवपर्याप्त्येकदेशापर्याप्तिविषयतायाःसमुदायपर्याप्तेरि- २२

त्युच्यतेतदाप्यव्याप्तिर्दुर्वारैवनिरुक्तव्यभिचारत्वेनसजातीयविशिष्टांतराघटितत्वंयत्त्वंतादृशबाधएवतद्पर्याप्तिविषयतायाः
तत्राभावात् नचस्ववृत्तियावद्धेत्वाभासविभाजकरूपेणसाजात्यंविवक्षणीयंतथाचबाधादिघटकव्यभिचारादौबाधत्वा
द्यसत्वात्नतादृशबाधादिसजातीयत्वंअतस्तत्संग्रहसंभवइतिवाच्यंएवंसतिबाधविशिष्टव्यभिचारादौस्ववृत्तिबाधत्व
व्यभिचारत्वादियावद्धर्मेणसजातीयविशिष्टांतरस्यव्यभिचारविशिष्टबाधादेःप्रसिद्धावपितद्घटितत्वासत्वेनातिव्याप्तेः
तस्माद्व्यभिचारघटितबाधादेःसंग्रहाभेददर्शनीयएवादरणीयःमेयत्वविशिष्टव्यभिचारादौतादृशव्यभिचारत्वावच्छिन्ने
नातिप्रसंगःनदोषताप्रसंगःअत्रमेयत्वविशिष्टव्यभिचारादौषड्स्यादित्यवहाराभावान्नेष्टापत्तिःनचविशिष्टव्यभिचारा
देःशुद्धव्यभिचारत्वादिनादोषत्वस्यासत्तनतयोक्तविशेषणदानेपितादृशव्यवहारापत्तिर्दुर्वारैवेतितत्रेष्टापत्तौव्यर्थविशेष
णमितिवाच्यंदोषादिपदस्यनिरुक्तविशेषणावच्छिन्नानुमितिप्रतिबंधकतावच्छेदकस्वावच्छिन्ननिरूपितविषयिताकत्वे
नअन्वयितावच्छेदकधर्मबोधकतायाःव्युत्पन्नतयाप्रकृतेचमेयत्वविशिष्टव्यभिचारत्वादिरूपस्यअन्वयितावच्छेदक
स्योक्तविशेषणविरहेणअतिप्रसंगाभावादितिहृदयंनन्वाश्रयासिध्यादिस्थलेपक्षतावच्छेदकाभाववत्पक्षकत्वा
दिकमेवदोषस्तस्यचहेतुनिष्ठतयाहेतोर्दुष्टत्वव्यवहारनियामकत्वात्तादृशधर्मस्यचतादृशाभाववत्पक्षादिरूप

तादृशविशिष्टांतरघटितत्वया अव्याप्तिरित्यत आह एवं चेति तादृशविशेषणदाने चेत्यर्थः पक्षतावच्छेदकादीनीति आदिपदात्
साध्यादिपरिग्रहः पर्वतादिधर्मिककांचनमयत्वादिविशिष्टबुद्धेः पर्वतः कांचनमयत्वाभाववान् इत्यादिधर्मिविशेष्य
कनिश्चयस्येव पर्वते कांचनमयत्वं नास्तीत्यादिधर्मिविशेषणकनिश्चयस्यापि विरोधित्वमानुभविकं अतस्तदपि पक्षस्या
पि दोषत्वमाह पक्षनिष्ठ इति आधेयतासंबंधेन पक्षविशिष्ट इत्यर्थः कोवारः समुच्चये साधनवद्वृत्तिः साध्याभाववद्वृत्तिसा
धनधर्मिकसाध्याभाववद्वृत्तित्वप्रकारकं ज्ञानं साधनधर्मिकव्याप्तिज्ञानप्रतिबंधकं साधनवृत्तिसाध्याभाववृत्तिना
नेपि साधने साध्याभाववद्वृत्तित्वे तुल्यमिति वेद्यं तया नियमतो भास इति तदपि व्याप्तिज्ञानप्रतिबंधकमिति मताभिप्रा
येण तादृशज्ञाने नियमतस्तदभावेपि मणिमंत्रादिन्यायेन तस्य व्याप्तिज्ञानप्रतिबंधकत्वमिति प्राचीनमताभिप्राये
णेवेदं दोष इति ननु पक्षतावच्छेदकाभाववत्पक्षत्वादिरिति शेषः तथा लक्ष्यत्वान्न तत्राव्याप्तिरिति भावः ननु पक्ष
तावच्छेदकाभाववत्त्वपक्षादीनां हेत्वाभासत्वं तत्कथं हेतौ दुष्टताव्यवहारः इत्यत आह येन केनापीति एकज्ञा
नविषयत्वादिनेत्यादिः तेह्यानूतदवच्छिन्नः दुष्टः दुष्टपदप्रतिपाद्यः तथा च हेतौ तादृशदोषानधिकरण
त्वेपि न क्षतिः दुष्ट इत्यादेः सामान्यतः संबंधित्वमात्रार्थत्वात् एवं चैकज्ञानविषयत्वादिना वह्न्यभा

ववधदादिरूपदोषस्य धूमादौ सत्त्वेपि न क्षतिः पर्वतादौ वह्न्यादिसाधने तस्य दुष्टत्वव्यवहारविषयतायाः तद्रूपावच्छि
न्नपक्षसाध्यहेतुवाचकपदसमभिव्याहारस्थले दुष्टपदस्य तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबं
धकतावच्छेदकत्वावच्छिन्ननिरूपितविषयिताकधर्मावच्छिन्नसंबंधिबोधकत्वव्युत्पत्त्या पूर्ववद्धारणेपि पूर्व
वदेव वह्निना धूमसाधने रासभादुष्टं इति व्यवहारो निरुक्तदोषमात्रस्य दुष्टव्यवहारविषयतावच्छेदकत्वे दुर्वा
र इति प्रकृते हेतुतावच्छेदकविशिष्टसंबंधानिष्ठापितावच्छेदको वाच्यः एतदभिप्रायेण प्रकृते हेतुरित्युक्तं ह्रदे व
ह्निः साधने धूमो दुष्ट इत्यत्र ह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबं
धकतावच्छेदकत्वावच्छिन्नविषयिताकधर्मावच्छिन्नसंबंधी धूम इत्यन्वयो बोध्यः तत्र प्रतिबंधकतावच्छेदक
त्वावच्छिन्नविषयिताकधर्मविशिष्टं एवं दुषधातोरर्थः साधनपदं लक्षणया धूमत्वावच्छिन्नहेतुकानुमितिपरं
तत्र ह्रद इति सप्तम्यंतार्थः ह्रदत्वावच्छिन्नपक्षकत्वस्य वह्नेरिति षष्ठ्यंतार्थस्य वह्नित्वावच्छिन्नसाध्यकत्वस्यान्व
यः तादृशानुमित्यन्वितसप्तम्यर्थनिरूपितत्वस्य दुषधात्वर्थैकदेशप्रतिबंधकत्वेन्वयः एवं च पर्वते वह्नेः सा
धने धूमो दुष्ट इत्यत्र पर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबंध

कतावच्छेदकत्वावच्छिन्ननिरूपितविषयिताकधर्मविशिष्टसंबंधीत्येव प्रतीयेत तादृशधर्मश्चाप्रसिद्ध एवेति नेत
थावे व्यवहारः पक्षविशेषादिकमन्तर्भाव्य धूमो दुष्टहेत्वादिव्यवहारस्तु अत एवेति दिक् ननु साधननिष्ठ
साध्याभाववद्वृत्तित्वादेरेव व्यभिचारतया प्रसिद्धिः नतु तद्विशिष्टसाधनादेः अतो न तस्य दोषत्वमिति क
श्चिदाह व्याचष्टेपि लक्षणमन्यथैवान्यथा अतिप्रसंगात् तादृशव्याख्यामुपन्यस्यति यादृशेति यद्रूपा
वच्छिन्ने सपक्षे ज्ञानं ज्ञानत्वावच्छिन्नेत्यर्थकं तस्य धर्मिणः तद्धर्मावच्छिन्नस्य तेन संबंधेनेति शेषः तादृशध
र्मवत्त्वं तद्रूपावच्छिन्नधर्मवत्त्वं साधनादिविशेषणकसाध्याभाववद्वृत्तित्वादिविशेष्यकज्ञानस्य व्याप्या
दिज्ञानप्रतिबंधकत्वेपि साध्याभाववद्वृत्तित्वादेराधेयतासंबंधेन साधनीयत्वादिकं न दोषः साधनादेः
साध्याभाववद्वृत्तित्वादिधर्मताविरहात् अत्राप्यवच्छेदकत्वं पूर्ववत् नतु स्वरूपसंबंधविशेषः पक्षतावच्छे
दकावच्छिन्ननिष्ठकेवलाभावत्वावच्छिन्नवत्त्वादावतिप्रसंगात् तदवच्छिन्नधर्मिक तद्रूपावच्छिन्नवत्ता
ज्ञानत्वस्यापि प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वात् अवच्छेदकतापर्याप्तिविवक्षणे चेदं हृदत्वावच्छि २५
न्नविशिष्टवह्न्यभावत्वाद्यवच्छिन्नवत्त्वे अव्याप्तिर्यतो वह्नित्वादिना घटावगाहिनोपि हृदो न वह्निमानि

त्यान्निश्चयस्य हृदो वह्निमानित्याद्यनुमितिप्रतिबंधकतया हृदत्वावच्छिन्नविशेष्यकवास्तववह्न्यभावत्वावच्छिन्नप्रकार
कनिश्चयत्वेन न प्रतिबंधकता अपितु तद्विशेष्यकवह्नित्वाद्यवच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारताक
निश्चयत्वेनैव अतस्तादृशमेव रूपं प्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणं नतु हृदत्वाद्यवच्छिन्नधर्मिकवह्न्यभा
वत्वावच्छिन्नप्रकारकनिश्चयत्वमिति यद्रूपपदेन वह्न्यभावत्वाद्युपादानं न संभवति पर्वतो वह्न्यभाववानित्यादौ
पर्वतत्वावच्छिन्ननिष्ठवह्नित्वाद्यवच्छिन्नवत्त्वरूपबाधादाववच्छेदकतापर्याप्तिघटितलक्षणस्यापि सत्त्वाल्लो
संभवोभिहितः पर्वतत्वाद्यवच्छिन्नविशेष्यकवह्नित्वावच्छिन्नप्रकारकनिश्चयत्वे पर्वतो वह्न्यभाववानित्य
नुमितिप्रतिबंधकतावच्छेदकतापर्याप्तिः पर्वतो वह्न्यभाववानित्यादौ पर्वतत्वाद्यवच्छिन्ननिष्ठवह्नित्वाद्य
वच्छिन्नवत्त्वरूपबाधादेरसंग्रहभयेन यद्रूपावच्छिन्नधर्मिणि यद्रूपावच्छिन्नप्रकारतानिरूपितयद्रूपावच्छिन्नप्र
कारताकनिश्चयत्वेन प्रतिबंधकता तद्रूपविशिष्टतद्रूपावच्छिन्नविशेषिततद्रूपावच्छिन्नवत्त्वं दोष इति विवक्षायां
असंभवात् अत्र साधननिष्ठसाध्याभाववद्वृत्तित्वादेरिव साध्याभाववद्वृत्तिसाधनादेरपि दोषत्वसत्त्वाविरहात्
एतावानायासोऽनर्थक इत्यस्वरसः कश्चिदित्यनेन सूचितः यथाव्याख्यातेस्य। याश्रुतार्थो निर्वह्निः पर्वतो वह्निमानि

साध्ये प्रकृतपक्षतावच्छेदकविशिष्टविशेष्यकप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितेरप्रसिध्याव्याप्तिर्दर्शयिष्य
त तेतत्रविशिष्यपक्षतावच्छेदकाद्यप्रवेशेनाप्रसिद्धिरस्तन्निवेशनप्रयोजनमाह अथेतिपर्वतादेः कांचनमयत्वेऽपि
रहदृत्यादौसर्वत्रहीनघरतिसंबध्यते तथाचविशिष्यपक्षतावच्छेदकाद्यप्रवेशपूर्वोक्तयुक्त्या असंभववारणा
यकिंचिद्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिसामान्यप्रतिबंधकत्वमेवनिवेश्यमितिपर्यवसितेवह्निमान्धूमादि
त्यादौपर्वतनिष्ठकांचनमयत्वाभावादौ अतिव्याप्तिः तस्यापिकांचनमयत्वादिरूपसहितपर्वतत्वादिरूपयत्किंचि
द्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबंधकज्ञानविषयत्वादितिभावः आदिपदंवस्त्वंतरसंग्राहकं प्रकृता
नुमितिविषयपदार्थाभावे अतिव्याप्तिंसूचयितुं तद्विषयसाध्यसामान्याभावेतांसूचयति ह्रदस्येतिह्रदनि
ष्ठवह्निशून्यत्वं धूमशून्यत्वं चेत्यर्थः ह्रदनिष्ठाभावे अतिव्याप्तिसूचनं च प्रकृतपक्षतावच्छेदकावच्छिन्नप्रकृतप
क्षकत्वरूपसमुदायदलस्यैवानिवेशे बोध्यं महानसीयेति महानसीयवह्न्यभावो महानसीयधूमाभावश्चेत्यर्थः
अत्र अतिव्याप्तिसूचनं प्रकृतसाध्यतावच्छेदकप्रकृतहेतुतावच्छेदकयोरनिवेशे बोध्यं इदमुपलक्षणं साध्यहे
त्वोरनिवेशेऽपि जलत्वाभावादावतिव्याप्तिर्बोध्या प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकत्वानिवेशे पक्षधर्मताज्ञा

प्रतिबंधकतामादाय अतिप्रसंगं सूचयित्वा व्याप्तिज्ञानप्रतिबंधकतामादाय अतिप्रसंगं सूचयति मेयत्वस्येति वह्निव्य
भिचार इत्यन्वयः अत्रातिव्याप्तिस्तादृशदलसमुदायस्यैवानिवेशे बोध्या प्रकृतहेतुकत्वं निवेश्याप्येतद्दोषस्य
शक्यवारणतयाहेतुतावच्छेदकानिवेशायाह केवलधूमस्येति वह्निशून्यदेशांतरगतधूमव्यक्ति यावत्केविशेषणानवच्छि
न्नस्येत्यर्थः साध्यतावच्छेदकानिवेशपूर्वं साध्यवत्ताज्ञानविरोधिनि अतिव्याप्तिर्दर्शिता इदानीं व्याप्तिज्ञानविरोधिनि अति
व्याप्तिं दर्शयति विशिष्टधूमस्य वाय्ववृत्तीयवह्निव्यभिचार इति दोषलक्षणस्य दुष्टलक्षणेऽपि पक्षतावच्छेदकादिनिवेश
स्य अवश्यतां दर्शयति नन्वेतत्संबंधेनेति तत्र पर्वतत्वावच्छिन्नवह्नित्वाद्यवच्छिन्नवह्निसाधने तस्य विशिष्टधूमत्वावच्छिन्न
स्यपक्षादौपक्षतावच्छेदकादेर्यादृशसंबंधेन विशेषणत्वं यत्राभिमतं तत्र तत्संबंधेन तदवच्छिन्नत्वं निवेश्यमिति सूचयि
तुं तत्सकृत्कं पक्षतावच्छेदकादिनिवेशे पक्षादिनिवेशस्याप्रयोजकत्वादितिवाच्यं तद्रूपावच्छिन्नपक्षसाध्यहेतुके दुष्ट
लक्षणे नीवेशनीयं तथा च नित्यनिर्वह्निः पर्वतो वह्निमानित्यत्र च पक्षतावच्छेदकेनिर्वह्नित्वविशिष्टपर्वते वह्निवैशिष्ट्या
यगाहित्वमनुमितेर्न संभवति स्वविरोधिधर्म धर्मितावच्छेदककत्वप्रकारकानाहार्यज्ञानस्यानभ्युपगमात् पर्व
तः पर्वतो वह्निमानित्यत्र पर्वताद्यनित्यरूपसाध्यतावच्छेदकावच्छिन्नप्रकारकत्वमनुमितेर्न संभवतीत्यस्मिन्

स्वाप्यत्वावच्छिन्नप्रकारकानाहार्यज्ञानस्य अननुभविकत्वादेवं पर्वतो वह्निमान् वह्निव्यभिचारिणस्तत्र वह्निव्यभिचा
२६ रित्वरूपहेतुतावच्छेदकावच्छिन्नवह्निव्याप्यत्ववैशिष्ट्यावगाहित्वमनुमितौ न संभवतीति पूर्वोक्तयुक्तेः पर्वतो वह्निमा
रि न् पर्वतादित्यत्र पर्वते पर्वतात्वत्वरूपहेतुतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वं नानुमितेः संभवति
उक्तयुक्तेरिति यथाविवक्षितानुमित्यप्रसिद्धेः प्रयोजकभेदेन नानास्थले अव्याप्तिकथनं न कोऽपि हेत्वा
भासः स्यादिति तथा च अपार्थकत्वरूपनिग्रहस्थानसत्त्वेन तथाप्रयोक्तुर्निग्रहापपत्तावपि निर्वह्नित्वे
न पर्वते वह्नेः साधने धूमो दुष्ट इति व्यवहारो दुरुपपाद इति भावः तादृशानुमितेः तथाविधविवक्षानुमि
तेः अप्रसिद्धत्वादिति आहार्यपरोक्षज्ञानानुपगमादिति भावः यद्विषयकनिश्चयस्येति यद्रूपा
वच्छिन्नविषयकनिश्चयस्येत्यर्थः उत्तरपदस्य तदुत्तरकालीनार्थकतया तदुत्तरमिति भाधात्
पास्याप्यानुमितिरूपक्रियाविशेषणं अतो द्वितीया जनेरकर्मकत्वे तादृशज्ञानरूपक्रियाविशेष
णं अतो ज्ञानपदमपि सार्थकं तत्पदं च तादृशनिश्चयपरामर्शकं उत्तरपदं चाव्यवहितोत्तरार्थकं कालश्च
ध्वनोत्पत्तिसंयोगाद्यस्तनेन द्वितीया अधिकरणे उत्तरपदस्योत्तरकालपरत्वादिति तु न युक्तं व्यापकत्वार्थक

स्यात्वेतत्संयोगस्य प्रकृते अविवक्षितत्वात् अनुमितौ अनुमितिसामान्ये द्वयोर्व्यतिरेक इति संबंधः तत्त्वं तद्रूपावच्छि
न्नत्वं अत्र च तज्ज्ञानानंतरज्ञाननिष्ठता दृशोभयाभावत्वस्थानीयाया एव विरोधिविषयितायाः प्रयोजकत्वात्
विरोधिविषयितायां तादृशनिश्चयीयत्वकथनं स्वरूपकीर्तनमात्रं न तु लक्षणघटकं तथा च यद्रूपावच्छिन्न
विषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्यस्य विरोधिविषयताप्रयुक्तोभयाभयाभाववत्त्वं तादृशरूपा
वच्छिन्नत्वं दोषत्वमिति समुदितार्थः वह्न्यभाववद्विशिष्टह्रदत्वावच्छिन्नविषयकनिश्चयानंतरं ह्रदो वह्निमा
न् वह्निव्याप्यधूमवांश्चेत्याकारकानुमितेः कदाचिदनुत्पत्त्या घटाद्यनुमितेश्च एवं तादृशनिश्चयाव्यवहि
तोत्तरानुमितिसामान्यान्तर्गतत्वात्तासु च ह्रदत्वादिविशिष्टे ह्रदे वह्नित्वावच्छिन्नवैशिष्ट्यावगाहित्वं वह्नित्वाव
च्छिन्नवह्निनिरूपितव्याप्तिविशिष्टवह्नित्वावच्छिन्नवैशिष्ट्यावगाहित्वं च तदुभयाभाववत्त्वमक्षतमेव तत्र तादृ
शनिश्चयीयविरोधिविषयताप्रयुक्तत्वमपि स्वनिष्ठप्रतिबंधतावच्छेदकधर्मस्य स्वानंतरोत्पन्नज्ञाननिष्ठप्रति
बध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूताया ह्रदत्वावच्छिन्नविशेष्यकत्वावच्छिन्नवह्नित्वावच्छिन्नभावत्वाव
च्छिन्नीयप्रकारितायाः तादृशवह्नित्वविशिष्टप्रकारकत्वघटितोभयाभावे तथात्वात् न चैतादृशविशिष्टप्रका
रकत्वमात्रं न विपरीतनिश्चयप्रतियोग्यतावच्छेदकं अपि तु तद्विशेषितानाहार्यज्ञानत्वं तत्कल्पितत्वप्रकारकत्वाभा

वत्स्य तथाविरोधिविषयिताप्रयुक्तत्वमिति वाच्यं विशिष्टाभावप्रयोजकस्य विशेष्यवन्निष्ठविशेषणाभावप्रयोजकत्वात्
अनाहार्यज्ञानत्वाद्याश्रयानुमित्यादिनिष्ठतादृशविशिष्टप्रकारकत्वाभावस्य विरोधिविषयताप्रयुक्तत्वासत्तेरिति
ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववाद्विशिष्टह्रदत्वाद्यवच्छिन्नेलक्षणासमन्वयः यद्विषयकनिश्चयाव्यवहि
तोत्तरानुमितित्वव्यापको विरोधिविषयताप्रयुक्तो व्यापकत्वविशिष्टसंयोगसंसर्गवह्निप्रकारत्वघटितोभयाभा
वः तत्त्वं अवच्छेदकावच्छेदेन साध्यसिद्धिस्थलीयं हेत्वाभासलक्षणं व्यापकत्वाद्यविशेषितसंयोगसंसर्गकवह्निप्र
कारकत्वघटितं सामानाधिकरण्येन साध्यसिद्धिस्थलीयं लक्षणं उभयसाधारणमेकं लक्षणं तु न संभवति अवच्छे
दकावच्छेदेन साध्यसिद्धौ सामानाधिकरण्येन बाधाव्याप्तेः सामानाधिकरण्येन तत्सिद्धौ अतिव्याप्तेर्वा प्रसंगा
त् निर्वह्निः पर्वतो वह्निमानित्याद्यो तादृशानुमितेरप्रसिद्धावपि वह्निमत्पर्वतादिरूपाश्रयासिध्यादिविषयकनिश्चया
नंतरं प्रसिद्ध घटाद्यनुमितिषु अन्यत्र प्रसिद्धपक्षतावच्छेदकविशिष्टविषयकत्वाद्यवच्छिन्नसाध्यतावच्छेदक
विशिष्टप्रकारकत्वघटितोभयाभाववत्त्वमस्त्येवेति तत्र लक्षणसमन्वयः न चाहार्यज्ञानमात्रप्रसिद्ध
स्य निर्वह्निपर्वतत्वावच्छिन्नविशेष्यकवह्निप्रकारकज्ञानत्वस्य विरोधिविषयकज्ञानप्रतिबध्यतावच्छेदकतया
तादृशधर्मावच्छिन्नेवाद्यादिप्रकारकत्वस्य अभावे विरोधिविषयताप्रयुक्तत्वं अप्रामाणिकमिति वाच्यं तादृश

ज्ञानत्वस्य प्रतिबध्यतावच्छेदकत्वेपि तद्व्यापकस्य पर्वतत्वाद्यवच्छिन्ने वह्नित्वाद्यवच्छिन्नाभावप्रकारकज्ञानत्वस्यैव वह्निवि
शिष्टपर्वतविषयकज्ञानप्रतिबध्यतावच्छेदकतया व्यापकाभावप्रयोजकस्य सुतरां व्याप्याभावप्रयोजकतया तादृशवि
शिष्टविशेष्यकत्वावच्छिन्नवह्न्यादिप्रकारकत्वाभावस्य तादृशदोषविषयताप्रयुक्तत्वस्य आवश्यकत्वात् न च विरो
धिज्ञानासत्वेपि निर्वह्निः पर्वतो वह्निमानित्यादिज्ञानस्य अनाहार्यस्यानुत्पत्त्यादिघटिततादृशाहार्य
सामग्र्यभावस्यैव च निर्वह्नित्वादिविशिष्टे वह्निवैशिष्ट्यावगाहित्वाभावप्रयोजकत्वं न तु विरोधिविषयितस्य कदाचिदप्य
भूतत्वादिति वाच्यं अभाववदधिकरणतया मेयविरोधिविषयताप्रयुक्तत्वस्य निवेश्यतया अधिकरणतानां च आभाव
भेदेपि अधिकरणभेदेन भिन्नतया विरोधिज्ञानानंतरोत्पन्नज्ञाने तादृशवैशिष्ट्यावगाहित्वाभावाधिकरणतायां विनि
गमनाविरहेण पूर्वज्ञानीयविरोधिविषयताया अपि प्रयोजकत्वात् यद्विषयताप्रयुक्ततादृशोभयाभावः तत्त्वमित्ये
तावन्मात्रे कृते ह्रदो वह्न्यभाववानित्यादिज्ञानीयवह्न्यभावादिविशिष्टह्रदादिविषयिताया इव तत्तद्दृत्तेः प्रतिवह्न्यभाव
त्वादिविशिष्टविषयिताया अपि प्रतिबंधकतावच्छेदककोटिप्रविष्टतया प्रतिबध्यतावच्छेदकस्य ह्रदत्वादिविशि
ष्टवह्न्यादिवैशिष्ट्यावगाहित्वस्य विरहप्रयोजकतया बाधादेकदेशवह्न्यभावत्वादिविशिष्टे अतिव्याप्तिरिति य
द्विषयकनिश्चयाव्यवहितोत्तरानुमितिसामान्यस्य विरोधिविषयताप्रयुक्तोभयाभाववत्त्वं निवेशितं न च यद्द

शविशिष्टविषयितासामान्यप्रयुक्तस्तादृशोभयाभावः तत्वमिसेवसम्यक्हृदत्वादिविशिष्टविषयितासामान्यांतर्गता
यांहृदस्त्यादिस्थानीयविषयितायांउभयाभावप्रयोजकत्वासत्वादितिव्याप्तेरनवकाशादितिवाच्यं पाषाणमयानवे
ह्निमानितिज्ञानविशिष्टस्य पर्वतः पाषाणमयइतिज्ञानस्य पर्वतोवह्निमानितिज्ञानप्रतिबंधकताज्ञानभेदेनविष
यताभेदाभावात् पाषाणमयत्वविशिष्टपर्वतादिविषयतासामान्यस्यैवोभयाभावप्रयोजकत्वात्त पाषाणमयत्वे
विशिष्टपर्वतादौ जातिव्याप्तेर्दुर्वारत्वात् वह्न्यभावादिविषयकहृदोवह्न्यभाववानित्यादिनिश्चयानंतरोत्पन्नघ
टानुमितौविरोधिविषयताप्रयुक्तोभयाभावसत्वात्केवलवह्न्यभावादावतिव्याप्तिः अतः सामान्यपदं पूरि
तंतथासतिवह्न्यभावादिनिश्चयानंतरोत्पन्नअनुमितिसामान्यांतर्गतायांवह्न्यभाववद्धृतलमित्यादिनिश्च
यानंतरजातहृदोवह्निमान्वह्निव्याप्यधूमवांश्चइत्यनुमितौविरोधिविषयताप्रयुक्ततादृशोभयाभावासत्वात्
नातिव्याप्तिः केवलहृदत्वादिनावह्न्यभावविशिष्टहृदादिविषयकनिश्चयानंतरमुक्तसमूहालंबनानुमितेः
उत्पत्तौ तादृशविशिष्टस्यापिदोषत्वानुपपत्तिरतोयत्पदंयद्रूपावच्छिन्नपरतयोपवर्णितेवह्न्यभावविशि २८
ष्टहृदविषयकस्य अनंतरंतादृशसमूहालंबनानुमित्युत्पत्तौतद्दोषताद्वस्थ्यंमतोनिश्चयस्येतिअ
नाहार्याप्रामाण्यज्ञानानास्कंदितसंशयान्यज्ञानपरंतेन आहार्याप्रामाण्यज्ञानास्कंदितस्यापिदोषवि

यकनिश्चयस्य अनंतरंतादृशानुमित्युत्पत्तावपिनक्षतिः दोषविषयकनिश्चयनाशेसतितदनुमितेरुत्पत्तौदोषापत्तिर
तोव्यवधाननिवेशः एवंदोषविषयलौकिकनिश्चयाव्यवहितपूर्वं अनुमित्युत्पत्तौ दोषः अतउत्तरक्षणित्वसामा
नाधिकरण्यमनुमितौनिवेश्य अतएकस्य बाधनिश्चयानंतरं अन्यस्यानुमित्युत्पत्तावपिनक्षतिः बाधनिश्चया
नंतरंपर्वतावच्छेदकावच्छिन्नसाध्यादिप्रकारकाहार्यस्यलौकिकस्य चप्रत्यक्षस्योत्पत्तौतादृशज्ञानसामान्य
मुपेक्ष्य अनुमितिसामान्यनिवेशः यत्साध्यकयत्पक्षकयद्धेतुकस्थलेयादृशदोषविषयकनिश्चयानंतरंकस्या
प्यनुमितिर्नजातातत्रतादृशानुमितेरप्रसिध्याअव्याप्तिः अतानुमितिस्थले अनाहार्यदोषविशेषाजन्यत्वानं
निवेश्यकल्पांतरमाह अनाहार्येतितथाचतादृशानुमित्यप्रसिद्धिर्यत्रतत्रतथाविधमनसोपनीतमानादि
कमादायैवलक्षणसंगमनीयमितिभावः बाधादिनिश्चयानंतरमाहार्यसाध्यादिप्रकारकप्रत्यक्षोत्पत्तौ
असंभवोऽव्याप्तिर्वेत्यतः अनाहार्येतिशंखोनपीतइत्यादिनिश्चयानंतरंशंखाहार्यपीतत्वादिप्रकारकस्य
दोषविशेषजन्यचाक्षुषादरुत्पत्तौशंखःपीतः शंखत्वादित्यादिस्थलीयबाधादौअव्याप्तिरतोमानसे
तिमानसपदंदोषविशेषाजन्यज्ञानपरंतेनानाहार्यगौरइत्यादिनिश्चयानंतरंमित्याज्ञानजन्यवासनारूपदोषवि

शेषजन्मस्यात्मविशेष्यकगौरत्वादिप्रकारकमानसस्यापत्तावपि अहं गौर आत्मत्वादित्यादिस्थलीयबाधादेनाव्या
प्तेः एतेन यादृशसाध्यपक्षहेतुकस्थले यादृशविषयकनिश्चयानंतरं विरोधिसामग्र्यादिवशेन मानसज्ञानं कदापिन
जातं तत्राव्याप्तिरिति निरस्तं तत्राप्यनुमितिशाब्दबोधादिकमादाय लक्षणगमनसंभवात् पक्षतावच्छेदकेत्या
दिदलद्वयनिवेशव्यावृत्तिः पूर्वोक्तरीत्या बाध्याविरोधिविषयताप्रयुक्तत्वनिवेशनप्रयोजनं स्वयमेव विवस्य
ति यत्र विषयविशेषसमूहालंबनज्ञानं कस्यापिन जातं तत्र पक्षतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्व
विशिष्टसाध्यव्याप्तिविशिष्टहेतुकवैशिष्ट्यावगाहित्वाभावरूपविशिष्टाभावाप्रसिध्या व्याप्तिरतो विशिष्टाभा
वमुपेक्ष्याभयाभावनिवेशः तादृशोभयाभावप्रयोजकविरोधिविषयत्वं यद्रूपविशिष्टविषयिताव्यापकं त
द्रूपावच्छिन्नत्वं शेषत्वमित्यस्यत्वेपि यथासन्निवेशनवैयर्थ्यं ननु कांचनमयः पर्वतो वह्निमान् धूमादित्यादौ पक्ष
तावच्छेदकविशिष्टपक्षाप्रसिध्या विशिष्टपक्षे विशिष्टसाध्यवैशिष्ट्याप्रसिद्धिरित्यादिरीत्याश्रयासिद्ध्यादाव
मि व्याप्तिरित्यत आह पक्षतावच्छेदके आरियद्वात्साध्यतावच्छेदकवैशिष्ट्यादिप्रतियोगिकः वैज्ञानिकमिति
तत्प्रकारेण ज्ञायमानत्वरूपमित्यर्थः तथा च पर्वतादेः कांचनमयत्वादिवैशिष्ट्यस्यावास्तविकस्य विरहेऽपि २९
तत्तद्रूपेण ज्ञायमानत्वमादाय लक्षणसमन्वय इति भावः न च हृदो वह्निमानित्यादिनिश्चयानंतरं ज्ञा

यमाने हृदो द्रव्यं जलमयं वह्निमत् वह्निव्याप्यधूमवदित्याकारकसमूहालंबनहृदत्वादिनाज्ञायमाने कथ्यादिवैशि
ष्ट्यावगाहित्वसत्वादसंभव इति वाच्यं पक्षतावच्छेदकावच्छिन्नया पक्षनिष्ठविशेष्यतया निरूपितया साध्य
तावच्छेदकावच्छिन्नप्रकारतया च साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितव्याप्यत्वप्रकारता
निरूपितहेतुतावच्छेदकावच्छिन्नहेतुप्रकारतान्यतमनियोगितयोरवगाहित्वात् इत्येवं विवक्षणात् विशिष्टविषया
प्रसिद्धावपि पर्वतो वह्निः कांचनमयत्वाद्यवगाहित्वमविषयतया व्यधिकरणकांचनमयत्वाद्यवच्छिन्ना
याः प्रसिध्या लक्षणसमन्वयात् व्याप्तिप्रकारतास्थाने च निरूप्यनिरूपकभावापन्नव्याप्तिघटकतत्पदार्थ
प्रकारतानां विवक्षणीयत्वेनेन धूमवान् हृद इत्यादौ वह्निव्यापकधूमसामानाधिकरण्यरूपव्याप्तेः अप्रसिद्धाव
पि न क्षतिः नन्वत्र व्याप्तिपदेनान्वयव्याप्तिश्चेदुच्यते तदा व्यतिरेकव्याप्तिज्ञानविरोधिनि साध्यनिष्ठा
भावप्रतियोगित्वादिरूप अनुपसंहारित्वे अव्याप्तिस्तादृशज्ञानस्य अन्वयव्याप्तिज्ञानाविरोधित्वात्
व्यतिरेकव्याप्तिविवक्षणे च हेतुनिष्ठसाध्याभाववद्वृत्तित्व च साध्यतावच्छेदकनिष्ठहेतुसमानाधिकरणा
भावप्रतियोगितावच्छेदकत्वादावव्याप्तिस्तज्ज्ञानस्य गत्याभावाद्यनवगाहितया व्यतिरेकव्याप्ति

ज्ञानविरोधित्वे मानाभावादत आह व्याप्तिश्चेति अन्वयनिरूपिता प्रकृतहेतुनिष्ठा प्रकृतसाध्यनिरूपितेत्तिर्यावत्तसा
ध्यात्यंतान्योन्याभावभेदेन भिन्ना अव्यभिचरितसाध्यसामानाधिकरण्यव्यापकसामानाधिकरण्यरूपानां
नाविरोधेवगाह्या अतोसंताभावादिगर्भव्याप्तिज्ञाने अन्योन्याभावादिगर्भव्याप्तिज्ञाने अन्योन्याभावादिग
र्भव्यभिचारज्ञानस्य व्यापकताज्ञाने साध्याभाववद्वृत्तित्वादिज्ञानस्य चाग्राह्याभावानवगाहितया अविरो
धित्वेपि न क्षतिः व्यतिरेकतः व्यतिरेकनिरूपिता साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपा ग्राह्या व्या
प्तिपदेन विवक्षणीया तथा च तद्व्याप्तिः प्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारताप्रतियोगि
त्वकूटाभाव एव निवेशनीय इति भावः ननु निर्वह्निः पर्वतो वह्निमानित्यादावपक्षतावच्छेदकविशिष्टसा
ध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वमेवाप्रसिद्धमिति किं पंक्तक्षपासमन्वय इति अत आह तादृ
शावगाहित्वप्रसिद्धिरिति आहार्यज्ञान एवेति निर्वह्नित्वविशिष्टे वह्निप्रत्यक्षं जायतामित्याकारकेच्छा
जन्यप्रत्यक्ष एवेत्यर्थः विरोविधिविषयताप्रयुक्तत्वनिवेशप्रयोजनमाह एवं चेति विरोधिविषयिताप्रयुक्तत्व ३०
निवेशाने त्वेत्यर्थः न क्षतिः ननु निर्वह्निः पर्वतो वह्निमानित्यादौ घटादौ जन्ति व्याप्तिः तस्य घटादिनिश्चय

स्य विरोध्यविषयकत्वात् तस्यानंतरानुमितिसामान्यनिष्ठतादृशाभयाभाववत्त्वस्य तज्ज्ञानीयविरोधिविषयताप्रयुक्तत्वे
पि घटादिनिश्चयोव्यवहितान्तरानुमितिसामान्यांतर्गतसमूहालंबनात्मकघटादिनिश्चयाव्यवहितोत्तरानु
मितौ विरोधिविषयताप्रयुक्ताभयाभाववत्त्वविरहान्नातिव्याप्तिरिति भावः प्रयोज्यप्रयोजकभावश्चानुभवसिद्धः
न स्वरूपसंबंधविशेषविरोधिपदप्रयोजनमाह एवमिति अननुमितावपीति न क्षतिः तस्य विरोध्यविषयकत्वादि
त्यनुषज्यते न क्षतिः न साध्यवत्पक्षसंगतिव्याप्तिः विरोधिविषयतापदेन तादृशाभयाभावप्रतियोगितावच्छेदक
कोटौ यद्रूपावच्छिन्नांशे यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निविष्टं तद्रूपावच्छिन्नविषयतानिरूपिततद्रूपा
वच्छिन्नाभावतद्व्याप्यान्यतरविषयितायाः साध्यविशिष्टपक्षविषयतान्यविषयताया वा विवक्षितत्वादिति
भावः न च सिषाधयिषाधीनायां साध्यनिश्चयानंतरसमूहालंबनानुमितौ तादृशाभयाभावासत्त्वात् सिद्धि
विषये अतिप्रसंगो न नास्ति एवं पक्षसाध्यनिश्चयोत्तरं तदतिरिक्तविषयकसाध्यविधेयकानुमितेरनुत्पा
देपि पक्षांशे साध्यांशे वा अधिकावगाहिन्या अनुमितेः साध्यधर्मितावच्छेदकतापन्नपर्वतत्वावच्छि
न्नधर्मिकता अन्यविधेयकानुमितेः साध्यावच्छिन्नपक्षविधेयकानुमितेश्चोत्पत्त्यातत्राभयाभावास

त्वादृपिनातिप्रसंगप्रसक्तिरिति वाच्यं यत्र विषये सिषाधयिषाबलात् सिध्युत्तरं तादृशानुमितिः प्रकृतसाध्यसि
ध्यप्रतिबध्यादिकविषयकानुमितिरपि कदाचिदपि न जाता तत्रैवातिव्याप्तेः संभवात् द्वितीयकल्पे विषय
ताप्रयुक्तत्वमात्रं निवेश्यं न तु विरोधिविषयताप्रयुक्तत्वपर्यंतमित्याशयेनाह ॥ मानसज्ञानेति साध्यनिश्च
यस्येत्यादिः उभयाभावघटितलक्षणस्य मेयत्वविशिष्टव्यभिचारादिवारणाय यथाश्रुते विशिष्टांतराघटि
तत्वनिवेशने उपदर्शितव्यभिचारघटितबाधाद्यव्याप्तिरिति विशिष्टांतरविषयिताप्रयोज्यतादृशोभया
भावप्रयोजकाभावाधिकरणताकत्वरूपतादृशविशेषणं निवेश्यं मेयत्वविशिष्टव्यभिचारविषयता
प्रयोज्यायाः उक्ताभावप्रयोजकव्याप्त्यादि अवगाहित्वाभाववत्तायाः शुद्धव्यभिचारादिविषयिताप्रयो ग
ज्यत्वनियमेन न प्रमेयत्वविशिष्टव्यभिचारादौ विशिष्टांतरविषयताप्रयोज्यत्वविषयताप्रयोज्य
निरुक्तोभयाभावप्रयोजकाभावाधिकरणताकत्वमिति नातिप्रसंगः उपदर्शितव्यभिचारघटितबाधादि २१
विषयिताप्रयोज्यायाः पक्षसाध्यावगाहित्वाभावाधिकरणतायाः तद्धर्मिकेरेव्यभिचारादिविषयि
ताप्रयोज्यत्वेन तत्संग्रहः न च विशिष्टपक्षे विशिष्टसाध्यवत्ताग्रहप्रतिबंधकतावच्छेदिकायाः तादृश

बाधादिविषयतांतःपातिव्यभिचारादिविषयताया अपि तादृशबाधादिविषयताप्रयोज्यायां विशिष्टपक्षे विशिष्टवै
शिष्ट्यावगाहित्वाद्यभावाधिकरणतायां प्रयोजकतया तादृशबाधादेः संग्रह इति वाच्यं यत्किंचिद्विशि
ष्टांतरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशेन तत्र तत्संग्रहसंभवात् व्यभिचारादिविषयतायाः
बाधादिविषयतांतःपातिविषयतामात्रवृत्तिरूपेण उपदर्शितसाध्यवत्ताग्रहप्रतिबंधकतावच्छेदकतया तेनैव
च रूपेण तादृशावगाहित्वविरहवत्ताप्रयोजकत्वात् तादृशस्य च रूपस्य बाधादिविषयतानंतःपातिव्यभिचारा
दिविषयतासाधारणव्यभिचारादिरूपविशिष्टविषयतात्वाव्यापकत्वात् तद्व्यापकरूपावच्छिन्नाप्रयोज्यत्व
स्य उक्तबाधादिविषयताप्रयोज्यायां उक्तसाध्याद्यवगाहित्वाभाववत्तायां अक्षतत्वात् मेयत्वविशिष्टव्यभि
चारादिविषयतायाः येन रूपेण व्याप्त्यादिग्रहप्रतिबंधकतावच्छेदकता तद्रूपेण अनिरुक्तविषयतात्वव्यापकेन
मेयत्वविशिष्टव्यभिचारादिविषयतांतःपातिव्यभिचारादिविषयतायाः मेयत्वविशिष्टव्यभिचारादिविष
यताप्रयोज्यव्याप्त्याद्यवगाहित्वाभाववत्तायां नियमतः प्रयोजकत्वान्नातिप्रसंगावकाशः बाधसत्प्रतिप
क्षादिविषयकज्ञानस्य नानाविधबाधादिविषयकज्ञानस्य वा अनंतरं जातायां घटानुमितौ बाधादिविषयता

प्रयोज्याया अभावाधिकरणतातस्या विशिष्टांतरविषयताप्रयोज्यत्वेपिस्वपूर्ववर्त्तिज्ञानीयविरोधिविषयताया एव
त्वनिष्ठप्रतिबध्यतावच्छेदकाभावाधिकरणतायांप्रयोज्यकत्वात् एकैकविधबाधादिमात्रज्ञानानंतरजातज्ञान
यातत्तद्बाधविषयताप्रयोज्याभावाधिकरणतातस्याविशिष्टांतरविषयिताप्रयोज्यतयाबाधादेर्लक्षणसम
न्वयः व्यभिचारादिघटितबाधादिविषयताप्रयोज्यायाः दीधितिकारोक्तोभयाभावाधिकरणतायाः व्या
प्याद्यवगाहितावरहप्रयोज्यत्वेनयत्किंचिद्विशिष्टांतराविषयितात्वव्यापकरूपावच्छिन्ना। तादृशबाधा
दिविषयतांतःपातिव्यभिचारादिविषयताप्रयोज्यत्वनियमात्तत्संग्रहाय तादृशोभयाभावप्रयोजकाभावा
धिकरणतापर्यंतनिवेशः तथासतिदर्शितोभयाभावाधिकरणतायाउक्तरूपावच्छिन्नव्यभिचारादिविषयता
प्रयोज्यत्वनियमेपितादृशोभयाभावाधिकरणताप्रयोजकसाध्यादिमत्तावगाहित्वाभावाधिकरण
तायाउक्तरूपावच्छिन्नव्यभिचारादिविषयताप्रयोज्यत्वेनतादृशबाधादेःसंग्रहः बाधादिविषयताप्रयो
ज्यस्यसाध्यादिमत्त्वावगाहित्वाभावस्यसत्प्रतिपक्षादिरूपविशिष्टांतरविषयताप्रयोज्यत्वनियमा ३२
त् असंभवः स्यादितिउभयाभावप्रयोजकाभावेविशिष्टांतरविषयिताप्रयोज्यत्वमनिवेश्यतादृशाभा

वाधिकरणतायांतन्निवेशः तथासति अधिकरणताया अधिकरणभेदेनभिन्नतयापूर्ववर्त्तिनिष्ठप्रतिबंधक
तावच्छेदकधर्मस्यैवतदुत्तरोत्पन्ननिष्ठप्रतिबध्यतावच्छेदकधर्माभावाधिकरणताप्रयोजकत्वेनैवबाधादि
निश्चयानंतरोत्पन्नानुमितिनिष्ठसाध्यादिमत्तावगाहित्वाभावाधिकरणतायांसत्प्रतिपक्षान्यादृशबा
धादिविषयतायाः अप्रयोजकत्वेनसामंजस्यात् अथतादृशोभयाभावघटितलक्षणकरणेपिकेवले
निर्वह्नित्वादिपक्षतावच्छेदककवह्न्यादिसाध्यकस्थलीयनिर्वह्निनिष्ठावह्न्यादिभावादिरूपदोषेअति
व्याप्तिः तादृशस्थलीयनिर्वह्निवृत्तिवह्न्यभावरूपबाधज्ञानस्याप्रतिबंधकतयातदीयविरोधिविषयतायाः
प्रतिबंधकतानवच्छेदकतयातथाविधोभयाभावाप्रयोजकत्वात् तस्यचदोषत्वानुपगमेचतादृशहेतो
दुष्टत्वव्यवहारानुपपत्तिः इष्टापत्तौचनिर्वह्निःपर्वतोवह्निमान् इत्यादावपितत्संभवेनैतादृशप्रयासवै
फल्यात् नचतत्र अभाववत्तानवह्निमान् इत्यनाहार्यज्ञानस्यप्रसिध्यातत्प्रतिबंधकीभूताभाववान्नि
र्वह्निरित्यादिज्ञानविषयएवदोषइतिवाच्यं अभाववत्त्वसामानाधिकरण्येननिर्वह्नित्वस्यमहस्यतादृ

शवह्निमत्त्वमहाविरोधित्वात् अभाववत्त्वावच्छेदेन वह्न्यामत्तामद्विरोधित्वेऽपि तादृशवह्न्यादिमत्त्वावगाहित्वस्य वह्न्य
भावादिमत्त्वरूपपक्षतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वाव्यापकतया तदवच्छिन्ननिरूपितप्रतिबं
धकतावच्छेदकविषयतायाः तथाविधोभयाभावाप्रयोजकत्वात् तद्विषयकत्वस्य दोषत्वानुपपत्तेः अभा
ववत्त्वावच्छेदेन निर्वह्नित्वमहस्य भ्रमरूपतया तद्विषयविशिष्टस्यैवाप्रसिद्धेः एवं वह्निमान् निर्वह्निरित्यादि
स्थलीयदोषे नितरामव्याप्तिः वह्निमन्निष्ठवह्निमत्त्वादेरेव तत्र दोषत्वसंभवात् तद्विषयकज्ञानस्य कचिदपि
प्रतिबंधकत्वायोगात् एवं यत्र निर्वह्निः पर्वतो वह्निमानित्यादौ पर्वतत्वादिसामानाधिकरण्येन वह्न्यभावादि
मत्त्वस्य पक्षतावच्छेदकघटकतात्तत्र पर्वतत्वसामानाधिकरण्येन वह्न्यादिमत्त्वं न दोषः विशिष्टोपसंग्रहाय २
विरोधित्वेन आश्रयासिद्ध्यादिरूपतानुपपत्तेः उक्तरीत्यैव तल्लक्षणानाक्रान्तत्वाच्च पर्वतत्वावच्छेदेन
वह्न्यादिमत्त्वमप्रसिद्धं वह्निशून्यपर्वतादेरपि सत्त्वात् नापि पर्वतत्वादिसामानाधिकरण्येन निर्वह्निपर्व
तत्वावच्छेदेन वा वह्न्यभावादिमत्त्वरूपबाधादिदोषः तज्ज्ञानस्य पक्षतावच्छेदकविशिष्टसाध्यवैशिष्ट्या
वगाहित्वव्यापकविषयताघटितधर्मावच्छिन्नप्रतिबंधकतया तत्र लक्षणगमनायोगात् नापि पर्वत

त्वावच्छेदेन वह्न्यभावादिमत्त्वमप्रसिद्धत्वादिति तत्र न कोऽपि दोषः स्यात् यत्तूभयुक्तं व्यापकत्वं तद्विषयकनिश्च
यनिष्ठविरोधिविषयिताया उभयाभावव्याप्यत्वं च स्वाश्रयतादृशनिश्चयाव्यवहितोत्तरानुमितित्वसंबंधेन
तादृशसंबंधस्याभाववत् दुत्तरमनुमितावित्युक्तं एवं च विरोधिविषयक यद्विषयकनिश्चयाव्यवहितोत्तरानुमि
तित्वव्यापकं तादृशोभयाभाव इति पर्यवसितं एवं च निर्वह्निर्वह्निमानित्यादिस्थलीयबाधादेः विषयतास्वरूप
संबंधरूपोभयाभावप्रयोजकत्वासंभवेऽपि निरुक्तोभयाभावप्रतियोगितावच्छेदककोटौ यद्रूपावच्छिन्नविशे
ष्यकयद्रूपावच्छिन्नप्रकारकत्वं निविष्टं तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नाभाववत्त्वाप्यान्य[illegible]प्रका त
रकत्वस्यैव विरोधिविषयित्वार्थकतया तत्र लक्षणसमन्वयमेव तादृशप्रयोजकत्वस्यानिवेशात् न चैवं त
त्र वस्तुमात्र जतिव्याप्तिर्दुर्वारैव तादृशोभयाभावस्य विरोधिविषयकसमूहालंबनरूपघटादिविषयक
निश्चयाव्यवहितोत्तरानुमितित्वव्यापकतया असत्त्वादिति वाच्यं विरोधिविषयतानतिरिक्त
वृत्तिः यद्विषयिता तच्छालिनिश्चयस्य निश्चयातेन विवक्षितत्वात् घटादिविषयितायास्तत्रानि

रुक्तविरोधिविषयितानतिरिक्तवृत्तित्वविरहात् न चैवं विरोधिविषयितानतिरिक्तवृत्तिर्यदीयविषयितात्त्वमित्यत्वाच
तेवसामंजस्येऽशेषवैयर्थ्यमिति वाच्यं यत्र पर्वतत्वादिसामानाधिकरण्येन वह्न्यादेः साध्यता तत्र पर्वतत्वादिसामा
नाधिकरण्येन वह्न्यभाववान्हिमत्त्वस्य विषयितायाः निरुक्तविरोधिविषयितानतिरिक्तवृत्तितया तत्रातिव्याप्तिवा
रकतया शेषसार्थक्यात् तदुपादाने तादृशवह्न्यभाववान्हिमत्त्वविषयकनिश्चयानंतरं पर्वतत्वसामानाधिकर
ण्येन वह्न्याद्यनुमित्युत्पत्त्या तादृशानुमितौ तथाविधोभयाभावासत्त्वेन अतिव्याप्त्यनवकाशादिति तत्तु छन्नि
र्वह्निः पर्वतो वह्निमानित्यादौ यत्र पर्वतत्वादिसामानाधिकरण्येन वह्न्यभावादेः पक्षतावच्छेदकघटकता तत्र पर्व
तत्वसामानाधिकरण्येन वह्न्यादिमत्त्वस्य विशिष्टपक्षग्रहविरोधित्वेन आश्रयासिद्ध्यात्मकस्य हेत्वाभास्य
तरताभयेन असंभवदोषभावस्य निरुक्तविरोधिविषयतानतिरिक्तवृत्तिविषयताकतया अतिव्याप्तिः तादृशोभया
भावप्रतियोगितावच्छेदकगर्भे यद्रूपविशिष्टे येन संबंधेन यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निवेश्य तत्तद्रूपा
वच्छिन्नविशेष्यकतत्संसर्गकतद्रूपावच्छिन्नप्रकारकानुमितित्वावच्छिन्ननिरूपितप्रतिबंधकतावच्छे
दकत्वरूपविरोधित्वस्य विषयितायां निवेशात् अशेषवैयर्थ्यमुक्तरीत्या निर्वह्निः वह्निमानित्यादिस्थलीयदोष ३४
अव्याप्तिश्च यत्तु पक्षतावच्छेदकविशिष्टनिरुक्तसाध्यहेतुवैशिष्ट्यावगाहिनिश्चयावृत्तिविषयितत्वेऽपि

रोधिविषयितापदार्थः तथा च यन्निरूपिततादृशविषयताशालिनिश्चयोत्तरानुमितित्वव्यापकउभयाभावः तत्त्वमिति समुदितार्थः
निश्चयत्वं च विशेषणविशेष्यतावच्छेदकभावानापन्नविरोधिकोटिद्वयप्रकारकैकधर्मिविशेष्यकज्ञानान्यज्ञानत्वं कोटि
द्वये विशेषणविशेष्यभावानापन्नत्वविशेषणात् निर्वह्निः पर्वतो वह्निमानित्यादौ पक्षतावच्छेदकविशिष्टे साध्यादिवैशिष्ट्य
ग्रहस्य एकत्र विरोधिद्वयप्रकारकत्वनियमेऽपि न तादृशवैशिष्ट्यावगाहिनिश्चयाप्रसिद्धिः यदीयविषयता तादृशनिश्चयाव
त्तित्वस्यमित्यत्र वर्तिष्ट तद्ह्रदो वह्निव्याप्यधूमवानित्यादौ ह्रदादिनिष्ठवह्न्यभावादिमत्त्वे अतिव्याप्तिः वह्न्यादिव्याप्यवत्ता
निश्चयस्यापि वह्न्यादिनिश्चयवत्कार्यसहभावेन वह्न्यभावादिमद्विरोधित्वात् वह्न्यभावादिमत्त्वविषयितायाः तादृशनि
श्चयावृत्तित्वादिति न शेषवैयर्थ्यमिति रीत्यापि न वह्निव्याप्यवान् वह्निव्याप्यव्याप्यवांश्च ह्रदो वह्न्यभाववानित्यतादृशाहार्य
ज्ञानोपगमेन च वह्न्यभावादिमत्त्वविषयितायाः वह्निव्याप्यादिमत्त्वनिश्चयवृत्तितया उक्तातिव्याप्त्यनवकाशेन शेषसार्थ
क्यानुपपत्तेः वह्निमान् वह्निव्याप्यवांश्च ह्रदो वह्न्यभाववानित्येतादृशाहार्यसाध्यादिवैशिष्ट्यनिश्चये ह्रदो वह्निमानित्या
दिस्थलीयबाधादिविषयतासत्त्वेन असंभवप्रसंगाच्च वह्न्यादिरूपधर्मितावच्छेदकानवच्छिन्नवह्न्यभावादिविशेषित
ह्रदादिनिरूपितविषयितायाः साध्यादिनिश्चयावृत्तित्वेऽपि घटादिनिरूपितायाः अपि दोषविषयित्वावच्छिन्नायाः विषयि
तायाः साध्यादिनिश्चयावृत्तितया घटादावुदासीने अतिव्याप्तिवारणाय यादृशविशिष्टविषयतासामान्यं तादृशनिश्च

यावत्तिताद्दशविशिष्टनिरूपितविषयितायाएवविषयोधिविषयितेत्यनेनविवक्षणीयतयाजगतीकारात्तमान्यवच्छियदी
यविषयतासामान्येनाद्दशनिश्चयावृत्तितदीयविषयताविरहस्तेननिर्वाहेपिविरोधिविषयताशालिनिश्चयोत्तरानु
मितिसामान्यद्वयोर्व्यतिरेकइत्यनभिधाययद्विषयकनिश्चयस्येत्यादिवक्राभिधानस्यग्रंथकारीतिचिरइत्यादि
नि एतेनविषयतायाउभयाभावप्रयोजकत्वंताद्दशोभयाभावप्रतियोगितावच्छेदकंयद्रूपविशिष्टेयेनसंबंधेन
यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वघटितंतद्रूपावच्छिन्नविशेष्यकत्वसंसर्गकतद्रूपावच्छिन्नप्रकारकत्वविशेषितेनअ
नुमितित्वेनानाहार्यलौकिकसंनिकर्षाजन्यज्ञानत्वेनवाअवच्छिन्नायाप्रतिबध्यतायानिरूपितप्रतिबंधकत्वंतानवच्छे
दकत्वंएवंचयाद्दशविशिष्टविषयतानिरूकतथाविधोभयाभावप्रयोजिकाताद्दशत्वमवलक्षणंविषयितादौवि
रोधित्वादिकथनंतुस्वरूपाख्यानमात्रमेवेतिप्रलपितमप्यनादेयमेवनिर्वह्निर्वह्निमानित्यादिस्थलीयदोषस्याकेयु
तयादुःसंग्रहत्वात् अत्रकेचित्तकव्हिरित्तत्ताग्निकेल्पइत्यत्रापिहीधितिकृतानतिर्भरःनिर्वह्निर्वह्निमानित्यादि
स्थलीयदोषासमेहणास्वरसस्याग्निमकल्पेकेचिदित्यनेनेत्यत्रापिकल्पेवदतीत्यनेनसूचितत्वात्निर्भरस्तुकेचिदित्यादिहि
तीयाग्निमकल्पएवतत्रप्रकर्षबोधनायप्रादुरितिकल्पमितिपरंतुघटाभावादिधर्मितावच्छेदककवह्न्यादिज्ञानंप्रतितद्धर्मि २५
तावच्छेदककवह्न्यभावादिमत्ताज्ञानस्यप्रतिबंधकत्वेकल्पनीयेधर्मितावच्छेदकभेदेनतदकल्पनाप्रयुक्तलाघवानुरोधेन

धर्मितावच्छेदकधर्माननिवेश्यअनाहार्यवह्न्यादिविशिष्टबुद्धित्ववह्न्यभावादिनिश्चयत्वाभ्यांसमानधर्मितावच्छेदकत्वप्रत्या क
सत्त्येवप्रतिबध्यप्रतिबंधकभावःकल्प्यतेएवंचतद्दशनिष्ठस्यपूर्ववर्तिप्रतिबंधकनिरूपितप्रतिबंधकतावच्छेदसंबंध
स्यउत्तरवर्तिनिष्ठप्रतिबध्यतावच्छेदकसंबंधेनतद्दशसंबंधित्वंप्रतिप्रयोजकतयावह्न्यभावनिष्ठवह्न्यभावादिप्रकार
कज्ञानीयधर्मितावच्छेदकतारव्यविषयतायाःतदुत्तरोत्पन्नअनाहार्यवह्न्यादिप्रकारकज्ञानस्यवह्न्यभावादिधर्मिता
वच्छेदककत्वविरहप्रयोजकत्वात्वह्न्यभावादिविशिष्टवह्न्यादिवैशिष्ट्यावगाहित्वविरहस्यवह्न्यभावादिप्रकारकनि
श्चयीयविषयिताप्रयुक्तत्वमक्षतमेवेतिताद्दशनिश्चयविषयस्यदोषत्वमव्याहतमेवनचधर्मितावच्छेदकनिष्ठप्र
त्यासत्त्याविपरीतज्ञानस्यप्रतिबंधकत्वेनिर्वह्निविशेष्यकवह्निज्ञानंजायतामित्याकारकेच्छाजन्यस्यनिर्वह्निर्वह्निमान्
घटोवाअश्ववह्निमानित्याद्याकाहार्यज्ञानस्यविपरीतज्ञानप्रतिबध्यतावच्छेदकानाक्रांततयाघटाभाववा
नित्यादिनिश्चयकालेतथाविधेच्छासत्त्वेघटाभावविशिष्टविशेष्यकवह्निज्ञानंजायतामित्याकारकेच्छाविनैवता
द्दशज्ञानापत्तिर्निवार्यायतःसामान्यतोवह्न्यादिज्ञानेच्छाविशिष्टान्यत्वरूपमनाहार्यत्वंनप्रतिबध्यतावच्छेदक
कोटौनिवेशनीयंकिंत्वाहार्यज्ञानोपपत्त्यर्थंविशेष्यतानिष्ठंयत्स्वविशेष्यतावच्छेदकत्वंतदवच्छेदकताव
च्छेदकत्वसंबंधावच्छिन्नाप्रतियोगिताकवह्न्यादिज्ञानेच्छाविरहस्ययास्वाव्यवहितप्राक्क्षणावच्छिन्नाधिक

करणतात्वह्निविशिष्टधर्मितावच्छेदकतायाएवप्रतिबध्यतावच्छेदकसंबंधत्वमुपेयतेतादृशाभावविरहस्यप्रतिबंधकविशेषणत्वमे
वृत्वाविशेषणताविशेषधर्मितावच्छेदकतासंबंधघटितसामानाधिकरण्यसंबंधेनोपगंतव्यमुक्तस्थलेच घटाभावा
दिशतादृशाभावविरहस्यसत्वात्नोक्तापत्तिरधिकमन्यत्रानुसंधेयमितिचहंतिनिर्वह्निःपर्वतोवह्निमानित्यादिस्थलीयदो
षसाधारण्यायप्रकारांतरेणलक्षणंवर्णयतांकेषांचिन्मतमाहतादृशपक्षइतिपक्षतावच्छेदकविशिष्टपक्षइत्य
र्थःतादृशसाध्यइतिसाध्यतावच्छेदकविशिष्टसाध्यइत्यर्थःतादृशहेत्विति हेतुतावच्छेदकविशिष्टहेत्वित्यर्थःज्ञा
नस्यविरोधिविषयकंयद्विषयकंज्ञानमितियोजनाज्ञानेज्ञानसामान्यंतेनघटादिविषयकस्यकस्यचित्समूहा
लंबनस्यतादृशज्ञानविरोधिबाधादिविषयकत्वेपिनातिप्रसंगःस्वावच्छिन्नविषयकत्वव्यापकतादृशज्ञानविरोधि
विषयताकधर्मवत्त्वमितिफलितार्थःअत्रविषयितानिष्ठस्वरूपसंबंधरूपतादृशज्ञानविषयकत्वस्यप्रतिबंधकताव
च्छेदकत्वात्मकतादृशज्ञानविरोधित्वमेवनिवेशनीयंनतुविषयनिष्ठंनिर्वाच्यतादृशज्ञानविरोधित्वंतस्यवलक्षणत्व
संभवेनशेषवैयर्थ्यप्रसंगात् अत्रचविषयनिष्ठस्यनिर्वाच्यतादृशज्ञानविरोधित्वस्यैवतदपेक्षयालघुतयातदेवाह
तादृशज्ञानविरोधित्वंचेतितादृशज्ञानविरोधित्वंयद्दितादृशज्ञानप्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयिताकधर्
मवत्त्वंतदापूर्वनिरुक्तयथाश्रुतलक्षणार्थएवपर्यवसानान्निर्वह्निःपर्वतोवह्निमानित्यादिस्थलीयदोषाव्याप्तितादव ३६

स्थ्यमितितन्निर्वक्तितज्ज्ञानविरोधित्वंचेत्तितद्विषयकेविषयकेत्तितथाचनिर्वह्निःपर्वतोवह्निमानित्यादौतादृशज्ञानप्रतिबंधकज्ञा
नाप्रसिद्धावपितद्विषयविषयकस्यनिर्वह्निःपर्वतइत्यादिज्ञानस्यप्रतिबंधकंयद्वह्निमान्पर्वतइत्यादिज्ञानंतद्विषयताश्रा
येववह्निमत्पर्वतादिरूपत्वात्तत्स्थलीयाप्रयासिद्धादौलक्षणासमन्वयःअथघटवद्भूतलादिरूपोदासीनपदार्थवि
य षयकसमूहालंबनात्मकपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतव्याप्यहेतुप्रकारकज्ञानविषयविषयकघटवद्भूत
लमित्यादिज्ञानप्रतिबंधकज्ञानाविषयघटाभाववद्भूतलादावतिव्याप्तिःनचपक्षतावच्छेदकावच्छिन्नविशेष्यक
साध्यतावच्छेदकविशिष्टसाध्यतन्निरूपितव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारकग्रहत्वव्यापकविषयताघ
टितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयताकधर्मवत्त्वनिवेशान्नदोषःघटवद्भू
तलादिविषयितायाःतादृशग्रहत्वाव्यापकत्वादितिवाच्यंयतःपर्वतत्वाद्यंशेवह्निमत्वाद्यनगाहिनःनिर्वह्निःपर्वतइ
वह्नि त्यादिज्ञानेस्ययथाप्रकारत्वाद्यनिरूपितानिर्वह्नित्वादिप्रकारतानिरूपितपर्वतादिविषयितासेवानाहार्यत्वविशिष्टतया
वह्निमान्पर्वतइत्यादिज्ञानप्रतिबध्यतावच्छेदिकातस्याश्चनिर्वह्निःपर्वतोवह्निमानित्याद्याकारकानाहार्यज्ञानसा
धारण्येमानाभावात्आहार्यज्ञानसामग्र्याःतादृशविषयिताप्रयोजकत्वासिद्धेःविपरीतज्ञानाभावाघटितायाः
तादृशविषयिताप्रयोजकानाहार्यज्ञानसामग्र्याश्चाहार्यज्ञानाजनकत्वात्तादृशग्रहत्वव्यापिकावह्नि

मत्त्वादिप्रकारतानिरूपितातादृशपर्वतादिविषयितासा च न तत्प्रतिबध्यतावच्छेदिकेति निर्वह्नित्वादिप्रकारता
निरूपितपर्वतादिविषयितात्वेन निर्वह्निः पर्वत इत्यादिज्ञानीयविषयितापि तथाविधमहत्त्वव्यापिकेति चेत्त
र्हि विषयितात्वादिना घटवद्भूतलादिविषयितानामपि तद्व्यापकतया उदासीनपदार्थवारणमशक्यमेवं य
द्रूपावच्छिन्ने यद्रूपावच्छिन्नप्रकारत्वं तादृशमहत्त्वव्यापकं तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकय
त्त्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वावच्छिन्ननिरूपितविषयिताकधर्मवत्त्वस्य विवक्ष
णीयतया सर्वसामञ्जस्यादिति दिक्। अत्र चास्वरसस्तु चानाय्य केचिदिति सचोक्तयुक्त्या निर्वह्निमानित्यादिस्थ
लीयदोषासंग्रहेणानुवृत्तधर्मितावच्छेदकत्वप्रत्यासत्त्या वह्निप्रकारकज्ञानं प्रति यद्वह्न्यभावप्रकारकज्ञानस्य प्र
तिबन्धकतामते निर्वह्निर्वह्निमानित्येतादृशज्ञानसमानविषयकानाहार्यवह्निमानित्याकारकज्ञानप्रतिबं
धकताभावाल्लक्षणसमन्वयः संभवतीति वाच्यं तादृशमताश्रयणेऽपि पर्वतो वह्निमानित्यादौ वह्न्यभाववद्वृ
त्तिहेतोर्दोषताप्रसंगात् यादृशेति सर्वत्र यद्रूपावच्छिन्नार्थकं तावद्रूप्यान्यत्वमिति यादृशपक्षसाध्यहेतुकस्थ
ले यादृशदोषज्ञानस्य प्रतिबध्यज्ञानं प्रतिसिध्यति यथा निर्वह्निः पर्वतो वह्निमान् धूमादित्यादौ वह्निविशि

ष्टपर्वतादिरूपाश्रयासिद्धिधूमाभावविशिष्टनिर्वह्निपर्वतादिरूपस्वरूपासिद्ध्यादीनां ज्ञानस्य तत्र तादृशदोषाणां
माद्यभावतद्व्याप्यरूपघटकभेदेन विशेषणविशेष्यभावभेदेन विभिन्नानामननुगतेन विशिष्यसो विशिष्टसाधने वै
शिष्ट्यग्रहविरोधित्वरूपासिद्धित्वादिनैव तावद्रूप्यान्यत्वघटकभेदप्रतियोगिविधया निवेशः। ननु वह्निविशिष्टप
र्वतत्व निर्धूमत्वविशिष्टनिर्वह्निपर्वतत्वादिना प्रयोजनविरहात् यादृशदोषविषयकज्ञानस्य प्रतिबध्यज्ञानमप्र
सिद्धं तत्तत्स्थलीयस्य यथा निर्वह्निर्वह्निमानित्यास्थलीयस्य च बाधादेर्ज्ञानस्य तादृशदोषाणामगत्या वह्न्यभाववि
ष्टनिर्वह्नित्ववह्न्यभावव्याप्यविशिष्टनिर्वह्नित्व निर्वह्निनिष्ठवह्न्यभावव्याप्यत्वादीनामननुगतेरूपेणोव[illegible]नि
वेशः। अत्र च विशिष्टभिन्नभिन्नत्वस्य शुद्धविशेष्यसाधारणतया सर्वमाकारादिवदित्यादेरावश्यकाभावविशि
ष्टसाध्यादिरूपबाधादिभिन्नत्वस्याप्रसिद्धतया च तत्तद्विशिष्टवैशिष्ट्यनिरूपितविषयितान्यतमविषयतानिरूपकता
वच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वमेवाभिमतं कथं च प्रकारो यादृशपक्षसाध्यहेतुकस्थले उक्तसमूहालम्बन
नुमितेरप्रसिद्धिः तन्नेवारणीयः यत्र तु तस्याप्रसिद्धिः तत्र लाघवाद्यथाश्रुतमूललक्षणमेव साधीयः शब्दाभेदस्या
किंचित्करतया। स्वयमेव वक्ष्यमाणत्वादित्यवधेयम्। यत्र चाश्रयासिद्ध्यादिरेकविध एव दोषः प्रतिबध्यज्ञानं च स
सिद्धं महानसत्ववान् पर्वतो वह्निमान् धूमादित्यादौ तत्र विशिष्टपक्षसमग्रहाविरोधित्वादिरूप आश्रयासिद्धित्वादेरे

दोषसामान्यलक्षणत्वमुचितंनतुमहानसत्वाद्यभावविशिष्टपर्वतत्वाद्यवच्छिन्नतादृशाभावव्याप्यविशिष्टपर्वतत्वा
द्यवच्छिन्नादिभिन्नभिन्नत्वस्यनिरुक्तसमूहालंबनानुमितिविरोधित्वस्यवागौरवादित्याशयेनाह एकमात्रदो
षस्थलेऽर्त्तिएकविधएवयत्रदोषः तद्विषयकज्ञानप्रतिबध्यज्ञानंचप्रसिद्धंतादृशस्थलकस्यार्थः तेनग्राह्याभावव
द्व्याप्यभेदेनविशेष्यविशेषणभावभेदेनचसर्वत्रदोषाणांनानात्वसंभवात एकमात्रदोषस्थलस्याप्रसिद्धत्वेपिपर्व
तान्यः पर्वतोवह्निमान्धूमादित्यादौ एकमात्रदोषस्थले साध्याभावतद्व्याप्यादिरूपघटकभेदेनविभिन्नाश्रयासि
द्ध्यादीनांअनुगमकरूपाभावेनतावदन्यान्यत्वस्यलक्षणत्वावच्छेदकत्वेपिचनक्षतिः नत्वेतादृशत्वंनिरुक्ताश्रया
सिद्धित्वादिकमितियावत् इदमुपलक्षणं यत्रपरामर्शविरोधिनोव्यभिचारविरोधासिद्ध्यस्त्रयोदोषाः नतुबा
धप्रतिरोधौ पर्वतोवह्निमान्हृदत्वादित्यादौ तत्रपरामर्शविरोधित्वमेवसामान्यलक्षणं यत्रबाधप्रतिरोधासिद्ध
योदोषाः नतुव्यभिचारविरोधौ हृदोवह्निमान्धूमात् कांचनमयहृदोवह्निमान्धूमात् हृदोवह्निमान्कांचनमयधूमा
दित्यादौ तत्रविशिष्टपक्षेविशिष्टसाध्यसाधनयोः वैशिष्ट्यावगाहियज्ज्ञानंतद्विरोधित्वमेवतथा एवंयत्रव्यभि २८
चारसिद्धिएवदोषोकांचनमयः पर्वतोधूमवान्वह्नेरित्यादौ तत्रविशिष्टपक्षविषयकव्याप्तिविशिष्टसाधनग्रहविरोधि

निरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारताके

त्वादिकं तथेत्यपि बोध्यं ननु तत्तद्धर्मावच्छिन्नभिन्नभिन्नत्वरूपलक्षणघटकतत्तद्धर्माणां भागासिद्धतया हेत्वाभाससामान्येत
रभेदाननुमापकत्वेपि व्यभिचारावारकतया तादृशेतरांशस्य वैयर्थ्यमित्यत आह स चेति स चान्योभावोतिरिक्त एवेति यो मनास
त्तत्तद्धर्मावच्छिन्नभेदकूटावच्छिन्नप्रतियोगिताकः अतिरिक्तः न तद्धर्मातिरिक्तः तथा च धर्मिभेदान्नैव वैयर्थ्यं तत्तद्धर्माव
च्छिन्नभेदमात्रावच्छिन्नप्रतियोगिताकान्योन्याभावस्य स्वप्रतियोगितावच्छेदकीभूतभेदप्रतियोगितावच्छेदकतत्त
द्धर्मास्वरूपत्वेपि तादृशभेदकूटावच्छिन्नप्रतियोगित्तिताकभेदत्वस्य नानाधर्मेषु कल्पनापेक्षया तद्विशिष्टस्यैक
स्यैव भेदस्य लाघवेन कल्पयितुं युक्तत्वादित्यभिप्रायः एतच्च यथाश्रुताभिप्रायेण तत्तद्धर्मावच्छिन्ननिरूपितविष
यितान्यतमविषयितानिरूपकतावच्छेदकधर्मवत्त्वस्य लक्षणत्वे तु अधिकरणविकासकतया विशेषणसार्थक्यमित्य
वधेयं ननु साध्यादिभेदेन लक्षणभेदे ह्रदो वह्निमान् धूमादित्यादिस्थलीयलक्षणस्य पंचहेत्वाभाससाधारण्या
संभवात् तादृशलक्षणाक्रांतानां पंचविधत्वोक्त्यसंगतिरित्यत आह पंचविधभेदोक्तिस्त्विति पंचविधत्वोक्ति
रित्यर्थः तत्संभवस्थले नियतपंचानामेव हेत्वाभासानां संभवो गोत्वाघटत्वादित्यादौ तत्स्थलीयलक्षणा
क्रांतस्य पंचविधत्वाभिप्रायेणेत्यर्थः नन्वेवं लक्षणाननुगमात् इतरभेदानुमाने भागासिद्धिरित्यत आह व्य

भिचारादेरिति साध्यादिभेदनियंत्रितत्वात् साध्यादिभेदनियंत्रितलक्ष्यतावच्छेदकत्वात् तथा च लक्षणस्य लक्ष्यतावच्छे-
दकस्याप्यननुगमान्न भागासिद्धिरिति भावः ननु एवमनुगतोक्त्यसंभवात् नायं प्रकारः साधीयान् इत्यत आह अग्रे
दृश्येति इदं पुनरिहावधेयं तावदन्यान्यत्वमितरभेदानुमापकमेव ननु दोषपदप्रवृत्तिनिमित्तं तथा सति निर्वह्नित्व-
विशिष्टे वह्नेः साधने धूमो दुष्ट इत्यादौ दुष्टपदस्य वह्न्यभावविशिष्टनिर्वह्नित्वावच्छिन्नान्यतमवदर्थकतया निर्वह्नि-
त्वविशिष्टे वह्नेः साधने इत्यादेरनन्वितार्थकत्वप्रसंगात् अप्रसिद्ध्या तस्य हेत्वनपि निर्वह्नित्वविशिष्टविशेष्यकवह्न्य-
नुमितिप्रयोजकत्वार्थकत्वासंभवात् किंतु अभावप्रयोजकभ्रमान्यवृत्तिविषयतानिरूपकत्वमेव तथा उक्तस्थले च प्र-
कारताप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारताकोभयमेव साधनपदार्थः प्रकारतारूप-
साधनपदार्थे अपरतदर्थैकदेशव्याप्तिप्रकारतानिरूपकप्रकारतायां च षष्ठ्यंतवह्निपदप्रतिपाद्यस्य वह्निनिष्ठत्वस्य
स्वरूपसंबंधेन साधने पदार्थप्रकारताद्वये सप्तम्यर्थस्य निर्वह्नित्वादिविशिष्टविशेष्यतायाम् अग्निनिरूपितत्वसंबंधेना-
न्वयः साधनपदोत्तरसप्तम्या निरूपकत्वं द्वित्वं चार्थः निरूपकत्वे च साधनपदार्थयोः पृथगन्वयः तदन्वितनिरू-
पकत्वे च द्वित्वान्वयः द्वित्वान्वयिता दृशा निरूपकत्वयोः दोषपदार्थघटकाभावेऽन्वयः तथा च निर्वह्नित्ववि-
शिष्टविशेष्यतानिरूपितवह्निनिष्ठप्रकारतानिरूपकत्वस्य तादृशविशेष्यतानिरूपिताया वह्निप्रकारता ३९